॥ ओ३म् ॥

प्रस्तावना

हितोपदेशोऽयं नाविदितचरः कस्यापि विदुषः । खिस्ताब्दादपि पूर्वं मैथिलीसभायां संगृहीतकथानां पञ्चतन्त्रेति नामोपलभ्यते । यद्वा महाराज चन्द्रगुप्तमौर्यस्य मन्त्रिणा गुरुणा विष्णुगुप्तनाम्ना चाणक्येन तस्य शिष्येण वा केनचित् प्रणीतं पञ्चतन्त्रमिति विद्वांसो मन्यन्ते ।

कोऽप्यस्य कर्ता स्यात् परमस्यातिप्राचीनत्वे नास्ति कश्चन सन्देहः । परं बौद्धकालादर्वाचीनमिति तु स्फुटमेव प्रतीयते । बौद्धा मनुष्यजन्म दुःखात्मकं हेयञ्च मन्यन्ते । निर्वाणं क्रियाविरममेव च ते उपादेयत्वेन स्वीकुर्वन्ति । पञ्चतन्त्रे तु जीवनं जीवितव्यत्वेन, 'शरीरमाद्यं खलु धर्मसाधनम्' मिति च पदे पदे समुपदिष्टम् ।

कथं राज्यं रक्षणीयं, केन प्रकारेण शत्रवो वशं नेयाः, को वा विधिः सुखजीवनस्येत्येतदेव प्रधानतयाऽस्मिन् प्रतिपादितम् । अस्माकमार्यजातिश्च पुनः, सम्प्रति प्रमादे तमसि प्रलीना, विगतवैभवा च वर्तते । अस्यै एतादृशान्येव शिक्षाप्रदानि पुस्तकानि हितावहानि ।

तस्मात् पञ्चतन्त्रादयं हितोपदेशः कैश्चिद् विद्वद्भिः संगृहीतः । तस्यापि च हितोपदेशस्यास्माभिः संशोधनेन बालग्राह्यता कृता ।

नास्मिन् कीदृगपि बालकेभ्यो हानिकरं किञ्चिदवशिष्यते । इदं च पुस्तकं नूनं गुरुकुलग्रन्थमालायां कामपि त्रुटिं पूरयिष्यति अन्याय पाठशालाध्यक्षैश्च पाठविधाविदं पुस्तकं स्थापयिष्यत इति भूयो भूय आशास्यते

शिक्षाया उद्देश्यं, न केवलं ज्ञानवृद्धिरपितु विचाराचारोन्नतताऽपि । तस्मादध्यापकैर्यथाकालं बाला उचितोपदेशैः, कथाभिप्रायैश्च बोधनीयाः । तदैवास्या मातृभूमेः काचनोन्नतिः सम्भाविनी ।

प्रकाशकः

॥ ओ३म् ॥

हितोपदेशः ।

प्रस्ताविका ।

सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।
जान्हवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ १ ॥
श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥
अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ३ ॥
सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ॥ ४ ॥
संयोजयति विद्यैव नीचगापि नरं सरित् ।
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम् ॥ ५ ॥
विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ६ ॥
विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥ ७ ॥
यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥ ८ ॥
मित्रलाभः सुहृद्भेदो विग्रहः संधिरेव च ।
पञ्चतन्त्रात्तथान्यस्माद्ग्रन्थादाकृष्य लिख्यते ॥ ९ ॥

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव—

'अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ १० ॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्' ॥ ११ ॥

इत्याकर्ण्य आत्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास—

'कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुःपीडैव केवलम् ॥ १२ ॥
अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ १३ ॥

किं च ।

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ १४ ॥
गुणिगणगणनारम्भे न पतति कठिनी सुसंभ्रमाद्यस्य ।
तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी नाम ॥ १५ ॥

अपरं च ।

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ॥ १६ ॥

तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् ।

आहारनिद्राभयमैथुनं च,
सामान्यमेतत्पशुभिर्नराणाम् ।

धर्मो हि तेषामधिको विशेषो
धर्मेण हीनाः पशुभिः समानाः ॥ १७ ॥

यतः ।

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ १८ ॥

तदत्र कश्चिदुद्योगः कर्तव्यः । यतः

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ १९ ॥

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच— 'भो भोः पण्डिताः, श्रूयताम् । अस्ति कश्चिदेवंभूतो विद्वान् यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः । यतः

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।
तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् ॥ २० ॥

उक्तं च—

हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ २१ ॥

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत्—'देव, महाकुलसंभूता एते राजपुत्राः । तन्मया नीतिं ग्राहयितुं शक्यन्ते । यतः

नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत्पाठ्यते बकः ॥ २२ ॥

अन्यच्च ।

अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते ।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ २३ ॥

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान्करिष्यामि ।

राजा सविनयं पुनरुवाच—

यथोदयगिरेर्द्रव्यं संनिकर्षेण दीप्यते । सूर्यस्येतिशेषः
तथा सत्संनिधानेन हीनवर्णोऽपि दीप्यते ॥ २४ ॥

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥ २५ ॥

तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरस्सरं पुत्रान्समर्पितवान् ।

इति प्रस्ताविका ।

मित्रलाभः ।

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात्प्रस्तावक्रमेण स पण्डितोऽब्रवीत्—

'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ १ ॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि ।', राजपुत्रैरुक्तम्—'आर्य, कथ्यताम् ।' विष्णुशर्मोवाच—'शृणुत । सम्प्रति मित्रलाभः प्रस्तूयते यस्यायमाद्यः श्लोकः—

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत्' ॥ २ ॥

राजपुत्रा ऊचुः—'कथमेतत् ।' विष्णुशर्मा कथयति—

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिदवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत्—'अद्य प्रातरेवानिष्टदर्शनं जातम् । न जाने किमनभिमतं दर्शयिष्यति ।' इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । यतः

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ३ ॥

अन्यच्च, विषयिणामिदमवश्यं कर्त्तव्यम् ।

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ ४ ॥

अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम् । स च

प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणानवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान्कपोतान्प्रत्याह—'कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः । तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेन अस्माभिरपि तथा भवितव्यं

कंकणस्य तु लोभेन मग्नः पंके सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा' ॥ ५ ॥

कपोता ऊचुः—'कथमेतत् ।' सोऽब्रवीत्—

कथा १ ।

अहमेकदा दक्षिणारण्ये चरन्नपश्यम् । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते—'भो भोः पान्थाः, इदं सुवर्णकंकणं गृह्यताम् ।' ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्—'भाग्येनैतत्संभवति किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया । यतः

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥ ६ ॥

किंतु सर्वत्र अर्थार्जने प्रवृत्तिः संदेह एव । तथा चोक्तम्—

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ ७ ॥

तन्निरूपयामि तावत् ।' प्रकाशं ब्रूते—'कुत्र तव कंकणम् ।

व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत्—'कथं मारात्मके त्वयि विश्वासः ।' व्याघ्र उवाच—'शृणु रे पान्थ, प्रागेव यौवनदशायामतिदुर्वृत्त आसम् । अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च । वंशहीनश्चासम् । ततः केनचिद्धार्मिकेणाहमादिष्टः—

'दानधर्मादिकं चरतु भवान् ।' तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः । मम चैतावांल्लोभ-

शिद्धो येन स्वहस्तस्थमपि सुवर्णकंकणं यस्मैकस्मैचिद्दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादतीति लोकप्रवादो दुर्निवारः। मया च धर्मशास्त्राण्यधीतानि। शृणु—

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन॥ ८॥

त्वं चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम्। तथा चोक्तम्—

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः॥ ९॥

अन्यच्च।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः॥ १०॥

तदत्र सरसि स्नात्वा सुवर्णकंकणं गृहाण। ततो यावदसौ तद्वचःप्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापंके निमग्नः पलायितुमक्षमः। पंके पतितं दृष्ट्वा व्याघ्रोऽवदत्—'अहह, महापंके पतितोऽसि। अतः त्वामहमुत्थापयामि।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्—

'न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥ ११॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः।

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अतोऽहं ब्रवीमि—'कंकणस्य तु लोभेन' इत्यादि। अतः सर्वथाऽविचारितं कर्म न कर्तव्यम्। यतः।

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम्' ॥ १२ ॥

तद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह—'आः, किमेवमुच्यते ।

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥ १३ ॥

यतः—

शंकाभिः सर्वमाक्रांतमन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ १४ ॥

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः । यतः—

असंभवं हेममृगस्य जन्म,
तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले,
धियोऽपि पुंसां मलिना भवन्ति ॥ १५ ॥

अनन्तरं सर्वे जालेन बद्धा बभूवुः ततो यस्य वचनात्तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति । यतः,

न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ १६ ॥

तस्य तिरस्कारं कृत्वा चित्रग्रीव उवाच—'नायमस्य दोषः । यतः,

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजंघा हि वत्सस्य स्तम्भीभवति बन्धने ॥ १७ ॥

अन्यच्च ।

स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः ।

न तु भीतपरित्राणवस्तूपालम्भपंडितः ॥ १८ ॥

विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । यतः,

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ १९ ॥

सम्पदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ २० ॥

इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् । यतः—

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ २१ ॥

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्—

'संहतास्तु हरन्त्येते मम जालं विहंगमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा' ॥ २२ ॥

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः ।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः—किमिदानीं कर्तुमुचितम् ।' चित्रग्रीव उवाच—

माता मित्रं पिता चेति स्वभावात्त्रितयं हितम् ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥ २३ ॥

तदस्माकं मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने वसति । सोऽस्माकं पाशांश्छेत्स्यति ।' इत्यालोच्य सर्वे हिरण्यक

चित्रसमीपं गताः। हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति। ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच—'सखे हिरण्यक, किमस्मान्न संभाषसे।' ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत्—'आः, पुण्यवानस्मि। प्रियसुहृन्मे चित्रग्रीवः समायातः।

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्' ॥ २४ ॥

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच—'सखे, किमेतत्।' चित्रग्रीवोऽवदत्—'सखे, अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च विधातृवशादुपैति ॥ २५ ॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य, बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच—मित्र, मा मैवम्। अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि, तदा मम पाशं पश्चाच्छेत्स्यसि।' हिरण्यकोऽप्याह 'अहमल्पशक्तिः। दन्ताश्च मे कोमलाः। तदेतेषां पाशांश्छेत्तुं कथं समर्थः। तद्यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि। तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि।' चित्रग्रीव उवाच—'अस्त्वेवम्। तथापि यथाशक्त्या एतेषां बन्धनं खण्डय।' हिरण्यकेनोक्तम्—'आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां संमतम्। यतः—

आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २६ ॥

चित्रग्रीव उवाच—'सखे, नीतिस्तावदीदृश्येव । किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः । तेनेदं ब्रवीमि । यतः—

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ २७ ॥'

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत्—'साधु मित्र, साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते ।' एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान्सादरं संपूज्याह—'सखे चित्रग्रीव, सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्य आत्मनि अवज्ञा न कर्तव्या । यतः—

योऽधिकाद्योजनशतात्पश्यतीहामिषं खगः ।
स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥ २८ ॥

इति प्रबोध्यातिथ्यं कृत्वालिंग्य च चित्रग्रीवस्तेन संप्रेषितो यथेष्टदेशान्सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

यानि कानि च मित्राणि कर्तव्यानि शतानि च ।
पश्य मूषिकमित्रेण कपोता मुक्तबन्धनाः ॥ २९ ॥

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह- 'अहो हिरण्यक, श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीं मिच्छामि । अतो मां मैत्र्येणानुग्रहीतुमर्हसि ।' एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यंतरादाह- 'कस्त्वम् ।' स ब्रूते—'लघुपतनकनामा वायसोऽहम् ।' हिरण्यको विहस्याह—'का त्वया सहमैत्री । यतः—

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान्भोक्ता कथं प्रीतिर्भविष्यति ॥ ३० ॥

अपरं च ।

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् ।
शृगालात्पाशबद्धोऽसौ मृगः काकेन रक्षितः' ॥ ३१ ॥

वायसोऽब्रवीत्—'कथमेतत् ।' हिरण्यकः कथयति—

कथा २ ।

अस्ति मगधदेशे चम्पकवती नामअरण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्हृष्टपुष्टांगः केनचिच्छृगालेनावलोकितः । तं दृष्ट्वा श्रृगालोऽचिन्तयत्—'आः, कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि ।' इत्यालोच्य उपसृत्यअब्रवीत्—'मित्र, कुशलं ते ।' मृगेणोक्तम्—'कस्त्वम् ।' स ब्रूते—'क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यम् ।' मृगेणोक्तम्—'एवमस्तु ।' ततः पश्चादस्तंगते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत्—'सखे चित्रांग, कोऽयं द्वितीयः ।' मृगो ब्रूते—'जम्बुकोऽयम् । अस्मत्सख्यमिच्छन्नागतः ।' काको ब्रूते—'मित्र, अकस्मादागन्तुना सह मैत्री न युक्ता । तथा चोक्तम्—अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।

मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः' ॥ ३२ ॥

तावाहतुः—'कथमेतत् ।' काकः कथयति—

कथा ३ ।

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिदुद्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षि-

शावकान्भक्षितुं तत्रगतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम्—'कोऽयमायाति ।' दीर्घकर्णो गृध्रमवलोक्य सभयमाह—

'हा, हतोऽस्मि । यतः—

तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम् ॥ ३३ ॥

अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्भवतु । तावद्विश्वासमुत्पाद्यास्य समीपं गच्छामि । इत्यालोच्योपसृत्याब्रवीत्—'आर्य, त्वामभिवन्दे ।' गृध्रोऽवदत्—'कस्त्वम् ।' सोऽवदत् 'मार्जारोऽहम् ।' गृध्रो ब्रूते—'दूरमपसर । नो चेद्धन्तव्योऽसि मया ।' मार्जारोऽवदत्—श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यम् यतः—

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥' ३४ ॥

गृध्रो ब्रूते—'ब्रूहि । किमर्थमागतोऽसि ।' सोऽवदत्—'अहमत्र गंगातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । यूयं धर्मज्ञानरता विश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः ।

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥ ३५ ॥

यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्य एव । यतः—

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन' ॥ ३६ ॥

गृध्रोऽवदत्—'मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि ।' तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च—'मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । परस्परं विवदमानानामपि धर्मशास्त्राणाम् 'अहिंसा परमो धर्मः' इत्यत्रैकमत्यम् । यतः—

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ३७ ॥

शृणु पुनः ।

स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत्' ॥ ३८ ॥

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः ।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं त ऊचुः—'अनेनैव जरद्गवेनास्माकं शावकाः खादिताः' इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः । अतोऽहं ब्रवीमि—'अज्ञातकुलशीलस्य' इत्यादि ॥ इत्याकर्ण्य स जम्बुकः सकोपमाह—'मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एव । तत्कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ ३९ ॥

अन्यच्च—

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ ४० ॥

यथायं मृगो मम बन्धुस्तथा भवानपि ।' मृगोऽब्रवीत्—'किमनेनोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयताम् ।' काकेनोक्तम्—'एवमस्तु ।' अथ प्रातः सर्वे यथाभिमतदेशं गताः।

एकदा निभृतं शृगालो ब्रूते—'सखे' अस्मिन्वनैकदेशे सस्यपूर्णक्षेत्रमास्ति । तदहं त्वां नीत्वा दर्शयामि ।' तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । अथ क्षेत्रपतिना तद्दृष्ट्वा पाशो योजितः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत्—'को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः ।' तत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—'फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मया वश्यं प्राप्तव्यानि । तानि बाहुल्येन भोजनानि भविष्यन्ति ।' मृगस्तं दृष्ट्वोल्लासितो ब्रूते—'सखे, छिन्धि तावन्मम बन्धनम् । सत्वरं त्रायस्व माम् ।' जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्—'दृढस्तावदयं बन्धः'। ब्रूते च—'सखे' स्नायुनिर्मिता एते पाशाः तदद्य भट्टारकवारे कथमेतान्दन्तैः स्पृशामि । मित्र, यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत्त्वया वक्तव्यं तत्कर्तव्यम् ।' इत्युक्त्वा तत्समीपे आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्य तथाविधं दृष्ट्वोवाच—'सखे' किमेतत् ।' मृगेणोक्तम्—'अवधीरितसुहृद्वाक्यस्य फलमेतत् । तथा चोक्तम्—

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत्संनिहिता तस्य स नरः शत्रुनन्दनः' ॥ १४ ॥

काको ब्रूते—'स वञ्चकः क्वास्ते ।' मृगेणोक्तम्—मममांसार्थी तिष्ठत्यत्रैव ।' काको ब्रूते—'उक्तमेव मया पूर्वम् ।

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।

विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ४२ ॥

यतः काकोदीर्घनिःश्वस्यब्रूते, 'अरेवञ्चक, किंत्वया पापकर्मणाकृतम् यतः—

संलापितानांमधुरैर्वचोभि-
मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके
किमर्थिनां वञ्चयितव्यमस्ति ॥ ७८ ॥

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ॥ ७९ ॥

अथवा स्थितिरियं दुर्जनानाम् ।
प्राक्पादयोः पतति खादति पृष्ठमान्सम्
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ ८१ ॥

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ ८२ ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन्काकेनावलोकितः। तमालोक्य काकेनोक्तम्—'सखे मृग, त्वमात्मानं मृतवत्संदर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसि ।' मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आः स्वयं मृतोऽसि' इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्ग्रहीतुं सयत्नो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः । तथा चोक्तम्—

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ ८३ ॥

अतोऽहं ब्रवीमि—'भक्ष्यभक्षकयोः प्रीतिः' इत्यादि ॥ काकः पुनराह—

'भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥ ८४ ॥

अन्यच्च ।

तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात्स्वभावो न निवर्तते ॥ ८५ ॥

हिरण्यको ब्रूते—'चपलस्त्वम् । चपलेन सह स्नेहः सर्वथा न कर्तव्यः तथा चोक्तम्—

मार्जारो महिषो मेषः काकः कापुरुषस्तथा ।
विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ ८६ ॥

किं चान्यत् । शत्रुपक्षो भवानस्माकम् । उक्तं चैतत्—

शत्रुणा नहि संदध्यात्सुश्लिष्टेनापि संधिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ ८७ ॥

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ८८ ॥

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥ ८९ ॥

लघुपतनको ब्रूते—'श्रुतं मया सर्वम् । तथापि मम चैतावान्संकल्पस्त्वया सह सौहृद्यमवश्यं करणीयमिति । नो चेदनाहारेणात्मानं व्यापादयिष्यामि । तथाहि ।

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ९० ॥

एतैर्गुणैरुपेतो भवद्भ्यो मया कः सुहृत्प्राप्तव्यः ।' इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह—'आप्यायितोऽहं भवताऽनेन वचनामृतेन । तथा चोक्तम्—

घर्मार्ते न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यंगमप्यर्पितम् ।
प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥ ६१ ॥

अन्यच्च ।

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ ६२ ॥

अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते । यतः ।

पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥ ६३ ॥

तद्भवतु भवतोऽभिमतमेव ।' इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं संतोष्य विवरं प्रविष्टः । वायसोऽपि स्वस्थानं गतः । ततः प्रभृति तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्तते ।

एकदा लघुपतनको हिरण्यकमाह—'सखे, कष्टतरलभ्याहारमिदं स्थानं परित्यज्य स्थानान्तरं गन्तुमिच्छामि ।' हिरण्यको ब्रूते—'मित्र, क्व गन्तव्यम् । तथा चोक्तम् ।

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
ना समीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ६४ ॥

वायसो ब्रूते—'अस्ति सुनिरूपितस्थानम् ।' हिरण्यकोऽवदत्—'किं तत् ।' वायसो ब्रूते—अस्ति दण्डकारण्ये कर्पूरगौराभिधानं

सरः । तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कच्छपो धार्मिकः प्रतिवसति ।
स च भोजनविशेषैर्मां संवर्धयिष्यति ।' हिरण्यकोऽप्याह—'तत्किमत्रावस्थाय मया कर्तव्यम् । यतः ।

यस्मिन्देशे न संमानो न वृत्तिर्न च बान्धवः ।
न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ ६९ ॥

ततो मामपि तत्र नय ।' अथ वायसस्तत्र तेन मित्रेण सह विचित्रालापैः सुखेन तस्य सरसः समीपं ययौ । ततो मन्थरो दूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्यं विधाय मूषिकस्यातिथिसत्कारं चकार ।
वायसोऽवदत्— 'सखे मन्थर, सविशेषपूजामस्मै विधेहि । यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यकनामा मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनापि सर्पराजो न कदाचित्कथयितुं समर्थः स्यात्' इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । मन्थरः सादरं हिरण्यकं संपूज्याह—'भद्र, आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि ।' हिरण्यकोऽवदत्—'कथयामि । श्रूयताम् ।

कथा ४

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद्वीणाकर्णो नाम परिव्राजकः समायातः । तेन सह कथाप्रसंगावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् । वीणाकर्ण उवाच—'सखे, किमिति मम कथाविरक्तोऽन्यासक्तो भवान् ।' चूडाकर्णेनोक्तम्— 'मित्र, नाहं विरक्तः ।

।किंतु परशर्थं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तकं विलोक्याह—'कथं मूषिकः स्वल्पबलोप्येतावद्- केनापि कारणेन भवितव्यम् । दूरमुत्पतति तदत्र क्षण विचिन्त्य परिव्राजकेनोक्तम्—'कारणं चात्र धन- बाहुल्यमेव भविष्यति । यतः ।

धनवान्बलवांल्लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ ९६ ॥

ततः खनित्रमादाय तेन विवरं खनित्वा चिरसंचितं मम धनं गृहीतम् । ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितु- मक्षमः सत्रासं मन्दं मन्दमुपसर्पंश्चूडाकर्णेनाहमवलोकितः । ततस्ते- नोक्तम्—

धनेन बलवांल्लोके धनाद्भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ॥ ९७ ॥

किं च ।

अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ ९८ ॥

एतत्सर्वमाकर्ण्य मयालोचितम्—'ममात्रावस्थानमयुक्तमिदानीम् यच्चान्यस्मा एतद्वृत्तान्तकथनं तदप्यनुचितम् । यतः ।

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥ ९९ ॥

अपि च ।

आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।
तपो दानापमानं च नव गोप्यानि यत्नतः ॥ १०० ॥

यत्रास्त्यैव यान्त्रया जीवनं तदतीव गर्हितम् । यतः ।

वरं विभवहीनेन प्राणैः संतर्पितोऽनलः ।
नोपचारपरिभ्रष्टः कृपणः प्रार्थितो जनः ॥ १०१ ॥

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते
निःसत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ १०२ ॥

इति विमृश्य 'तत्किमहं परपिण्डेनात्मानं पोषयामि । कष्टं भोः ।
तदपि द्वितीयं मृत्युद्वारम् । यतः ।

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ १०३ ॥

इत्यालोच्यापि लोभात्पुनरप्यर्थं ग्रहीतुं ग्रहमकरवम् ।
ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितश्चाचिन्तयम्—

'धनलुब्धो ह्यसंतुष्टोऽनियतात्माऽजितेन्द्रियः ।
सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ॥ १०४ ॥'

तथा च ।

संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ १०५ ॥

तदत्रावस्थोचितकार्यपरिच्छेदः श्रेयान् ।

को धर्मो भूतदया किं सौख्यमरोगिता जगति जन्तोः ।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥ १०६ ॥

तथा च ।

परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।
अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ॥ १०७ ॥

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ १०८ ॥

अपरं च ।

पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः' ॥१०९ ॥

इत्यालोच्याहं निर्जनवनमागतः । यतः ।

वरं वनं व्याघ्रगजेंद्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्या परिधानवल्कलं
न बंधुमध्ये धनहीनजीवनम् ॥ ११० ॥

ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः । यतः

संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः संगमः सुजनैः सह ॥ १११

मन्थर उवाच—

'अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं
आयुष्यं जललोलबिन्दुचपलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निंदितमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥ ११२ ॥

युष्माभिरतिसंचयः कृतः । तस्यायं दोषः । शृणु ।

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ ११३ ॥

उक्तं च ।

कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः ।

पश्य संचयशीलोऽसौ धनुषा जम्बुको हतः' ॥ ११४ ॥

तावाहतुः—'कथमेतत् ।' मन्थरः कथयति—

कथा ६ ।

आसीत्कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मृगमन्विष्यमाणो विन्ध्याटवीं गतवान् । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः । शूकरेणापि घनघोरगर्जनं कृत्वा स व्याधो मुष्कदेशे हतः सच्छिन्नद्रुम इव भूमौ निपपात ।

अथ तयोः पादास्फालनेन सर्पोऽपि मृतः । अथानन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान्मृतान्मृगव्याधसर्पशूकरानपश्यत् । अचिन्तयच्च— 'अहो' अद्य महद्भोज्यं मे समुपस्थितम् ।

मासमेकं नरो याति, द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति, अद्य भक्ष्यो धनुर्गुणः ॥ ११५ ॥

ततः प्रथमबुभुक्षायामिदं निस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि । इत्युक्त्वा तथा कृते सति छिन्ने स्नायुबन्धने उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः । अतोऽहं ब्रवीमि—'कर्तव्यः संचयो नित्यम्' इत्यादि ॥

तथा च ।

यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ ११६ ॥

यातु । किमिदानीमतिक्रान्तोपवर्णनेन । यतः ।

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ ११७ ॥

तत्सखे, सर्वदा त्वया सोत्साहेन भवितव्यम् । एतस्मिंश्च, दशाविशेषे शान्तिः करणीया । एतदप्यनिकष्टं न त्वया मन्तव्यम् । यतः ।

राजा कुलवधूर्विप्रा मंत्रिणश्च पयोधराः ।
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ॥११८॥

इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत् । कापुरुषवचनमेतत् । यतः ।

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यांति काकाः कापुरुषा मृगाः ॥ ११९ ॥
को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलांगुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्यात्मनः ॥ १२० ॥

अपरं च ।

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥ १२१ ॥
आमरणान्ताः प्रणयाः कोपास्तत्क्षणभंगुराः ।
परित्यागाश्च निःसंगा भवन्ति हि महात्मनाम्' ॥ १२२ ॥

इति श्रुत्वा लघुपतनको ब्रूते—'धन्योऽसि मन्थर, सर्वथा श्लाघ्यगुणोऽसि । यतः'

सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।
गजानां पंकमग्नानां गजा एव धुरंधराः ॥ १२३ ॥

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः संतुष्टाः सुखं निवसन्ति ।'

अथ कदाचिच्चित्रांगनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः । ततः पश्चादायान्तं मृगमवलोक्य भयं संचिन्त्य मन्थरो जलं प्रविष्टः । मूषिकश्च विवरं गतः । काकोऽप्युड्डीय वृक्षमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्नकोऽप्यायातीत्यालोचि-

तम् । पश्चात्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः । मन्थरेणोक्तम्—भद्रम् । मृग, स्वागतम् । स्वेच्छयोदकाद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् ।' चित्राङ्गो ब्रूते—'लुब्धकत्रासितोऽहं भवतां शरणमागतः । भवद्भिः सह सख्यमिच्छामि ।' हिरण्यकोऽवदत्—'मित्रत्वं तावदस्माभिः सह भवतोयत्नेन मिलितम् । यतः ।

औरसं कृतसंबन्धं तथा वंशक्रमागतम् ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥ १२४ ॥

तदत्र भवता स्वगृहानिर्विशेषं स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दो भूत्वा स्वेच्छाहारं कृत्वा पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः । अथ मन्थरेणोक्तम्—'सखे मृग, एतस्मिन्निर्जने वने केन त्रासितोऽसि । कदाचित्किं व्याधाः संचरन्ति ।' मृगेणोक्तम्—'अस्ति कलिंगविषये रुक्मांगदो नाम नरपतिः । स च दिग्विजयव्यापारक्रमेणागत्य चंद्रभागानदीतीरे समावासितकटको वर्तते । प्रातश्च तेनागत्य कर्पूरसरःसमीपे भवितव्यमिति व्याधानां मुखात्किंवदन्ती श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथावसरकार्यमारभ्यताम् ।' तच्छ्रुत्वा कूर्मः सभयमाह—'जलाशयान्तरं गच्छामि ।' काकमृगावुक्तवन्तौ—'एवमस्तु ।' ततो हिरण्यको विहस्याह—'जलाशयान्तरे प्राप्ते मन्थरस्य कुशलम् । स्थले गच्छतः कः प्रतीकारः । यतः ।

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम् ।
स्वभूमिः श्वापदादीनां राज्ञां मन्त्री परं बलम् ॥ १२५ ॥

तद्धितवचनमवधीर्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य मन्थरश्चलितः । तेऽपि हिरण्यकादयः स्नेहादनिष्टं शंकमाना मन्थरमनुगच्छन्ति । ततः स्थले गच्छन्केनापि व्याधेन काननं पर्यटता मन्थरः

प्राप्तः। प्राप्य तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा भ्रमक्लेशात्क्षुत्पिपासाकुलः स्वगृहाभिमुखं चलितः। अथ मृगवायसमूषिकाः परं विषादं गच्छन्तस्तमनुजग्मुः। ततो हिरण्यको विलपति—

'एकस्य दुःखस्य न यावदन्तं
गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे
छिद्रेष्वनर्था बहुलीभवन्ति ॥१२६॥

इति मुहुर्विचिन्त्य 'अहो दुर्दैवम्। यतः।

स्वकर्मसंतानविचेष्टितानि।
कालान्तरावर्तिशुभाशुभानि—
इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥ १२७ ॥

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह—'यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम्।' तावूचतुः—'सत्वरं कार्यमुच्यताम्।' हिरण्यको ब्रूते—चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मानं दर्शयतु। काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु। नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम्। ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि। संनिहिते लुब्धके भवद्भ्यां पलायितव्यम्।' चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत्। ततः कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः। तत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धनं छिन्नम्। स कूर्मः सत्वरं जलाशयं प्रविवेश। स मृग आसन्नं तं व्याधं विलोक्योत्थाय पलायितः।

प्रत्यावृत्य लुब्धको यावत्तरुतलमायाति तावत्कूर्ममपश्यन्नचिन्तयत—'उचितमेवैतन्ममासमीक्ष्यकारिणः यतः—

ये ध्रुवाणि परित्यज्य, अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव हि' ॥ १२८ ॥

ततोऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः । मंथरादयः सर्वे त्यक्तापदः स्वस्थानं गत्वा यथासुखमास्थिताः ॥

अथ राजपुत्रैः सानंदमुक्तम्—'सर्वं श्रुतवंतः सुखिनो वयम् । सिद्धं नः समीहितम् ।' विष्णुशर्मोवाच—एतावता भवतामभिलषितं संपन्नम् । अपरमपीदमस्तु:—

मित्रं प्राप्नुत सज्जना जनपदैर्लक्ष्मीः समालम्ब्यतां
भूपालाः परिपालयन्तु वसुधां शश्वत्स्वधर्मे स्थिताः ।
आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्धचूडामणिः' ॥ १२९ ॥

इति हितोपदेशे मित्रलाभो नाम प्रथमः कथासंग्रहः समाप्तः

—:०:—

ता॰ २८ सितंबर सन् ... को ...
यहाँ तक पढ़ा ।

सुहृद्भेदः ।

अथ राजपुत्रा ऊचुः—'आर्य, मित्रलाभः श्रुतस्तावदस्माभिः । इदानीं सुहृद्भेदं श्रोतुमिच्छामः ।' विष्णुशर्मोवाच—सुहृद्भेदं तावच्छृणुत, यस्यायमाद्यः श्लोकः—

वर्धमानो महास्नेहो मृगेन्द्रवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः' ॥ १ ॥

राजपुत्रैरुक्तम् —'कथमेतत् ।' विष्णुशर्मा कथयति—

अस्ति दक्षिणापथे सुवर्णवती नाम नगरी । तत्र वर्धमानो नाम वणिग्निवसति । तस्य प्रचुरेऽपि वित्तेऽपरान्बन्धूनतिसमृद्धान्समीक्ष्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव । यतः ।

अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ २ ॥

तथा चोक्तम्—

अलब्धं चैव लिप्सेत लब्धं रक्षेदवक्षयात् ।
रक्षितं वर्धयेत्सम्यग्वृद्धं तीर्थेषु निक्षिपेत् ॥ ३ ॥

यतो लब्धमिच्छतोऽर्थयोगादर्थस्य प्राप्तिरेव । लब्धस्याप्यरक्षितस्य निधेरपि स्वयं विनाशः । अपि च । अवर्धमानश्चार्थः काले स्वल्पव्ययोऽप्यञ्जनवत्क्षयमेति । अनुपभुज्यमानश्च निष्प्रयोजन एव सः ।

तथा चोक्तम्—

धनेन किं यो न ददाति नाश्नुते
बलेन किं यश्च रिपून्न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्किमात्मना
यो न जितेन्द्रियो भवेत् ॥ ४ ॥

इति संचिन्त्य नन्दकसंजीवकनामानौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यसंपूर्णं कृत्वा वाणिज्येन गतः काश्मीरं प्रति ।

अथ गच्छतस्तस्य सुदुर्गनाम्नि महारण्ये संजीवको भग्नजानुर्निपतितः । तमालोक्य वर्धमानोऽचिन्तयत्—

करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेवास्य यद्विधेर्मनसि स्थितम् ॥ ५ ॥

किं तु ।

विस्मयः सर्वथा हेयः प्रत्यूहः सर्वकर्मणाम् ।
तस्माद्विस्मयमुत्सृज्य साध्ये सिद्धिर्विधीयताम् ॥ ६ ॥

इति संचिन्त्य संजीवकं तत्र परित्यज्य वर्धमानः पुनः स्वयं धर्मपुरं नाम नगरं गत्वा महाकायमन्यं वृषभमेकं समानीय धुरि नियोज्य चलितः । ततः संजीवकोऽपि कथंकथमपि खुरत्रये भारं कृत्वोत्थितः । यतः ।

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥ ७ ॥

ततो दिनेषु गच्छत्सु संजीवकः स्वेच्छाहारविहारं कृत्वारण्यं भ्राम्यन्हृष्टपुष्टांगो बलवन्ननाद । तस्मिन्वने पिंगलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्निवसति ।

स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमगच्छत् । तेन च तत्र सिंहेनाननुभूतपूर्वकमकालघनगर्जितमिव संजीवकनर्दितमश्रावि । तच्छ्रुत्वा पानीयमपीत्वा स चकितः परिवृत्य स्वस्थानमागत्य किमिदमित्यालोचयँस्तूष्णीं स्थितः । स च तथाविधः करटकदमनकाभ्यामस्य मंत्रिपुत्राभ्यां शृगालाभ्यां दृष्टः । तं

तथाविधं दृष्ट्वा दमनकः करटकमाह—सखे करटक, किमयमुदकार्थी स्वामी पानीयमपीत्वा सचकितो मन्दं मन्दमवतिष्ठते । करटको ब्रूते—'मित्र दमनक' अस्मन्मतेनास्य सेवैव न क्रियते । यदि तथा भवति तर्हि किमनेन स्वामिचेष्टानिरूपणेनास्माकम् । यतोऽनेन राज्ञा विनापराधेन चिरमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम्—

अबुधैरर्थलाभाय पण्यस्त्रीभिरिव स्वयम् ।
आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥ ८ ॥

दमनको ब्रूते—'मित्र सर्वथा मनसापि नैतत्कर्तव्यम् ! यतः

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ ९ ॥

करटको ब्रूते—'तथापि किमनेनास्माकं व्यापारेण । यतोऽव्यापारेषु व्यापारः सर्वथा परिहरणीयः । पश्य ।

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स भूमौ निहतः शेते कीलोत्पाटीव वानरः, ॥ १० ॥

दमनकः पृच्छति—'कथमेतत्', करटकः कथयति—

कथा १ ।

अस्ति मगधदेशे धर्मारण्यसंनिहित वसुधायां शुभदत्तनाम्ना कायस्थेन विहारः कर्तुमारब्धः । तत्र करपत्रदार्यमाणैकस्तम्भस्य कियद्दूरं स्फाटितस्य काष्ठखण्डद्वयमध्ये कीलकः सूत्रधारेण निहितः । तत्र बलवान्वानरयूथः क्रीडन्नागतः एको वानरः कालप्रेरित इवतं कीलकं हस्ताभ्यां धृत्वोपविष्टः । तत्र तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टम् । अनन्तरं स च सहजचपलतया महता प्रयत्नेन तं कीलकमाकृष्टवान् । आकृष्टे च कीलके चूर्णिता-

स्तब्धहृदयः पंचत्वं गतः । अतोऽहं ब्रवीमि—'अव्यापारेषु व्यापारम्' इत्यादि ॥ दमनको ब्रूते—'तथापि स्वामिचेष्टानिरूपणं सेवकेनावश्यं करणीयम् ।' करटको ब्रूते—'सर्वस्मिन्नधिकारे य एव नियुक्तः प्रधान-मन्त्री स करोतु । यतोऽनुजीविना पराधिकारचर्चा सर्वथा न कर्तव्या । पश्य ।

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया ।
स विषीदति चीत्काराद्गर्दभस्ताडितो यथा' ॥ ११ ॥

दमनकः पृच्छति—'कथमेतत्' करटको ब्रूते—

कथा २ ।

अस्ति वाराणस्यां कर्पूरपटको नाम रजकः स च कदाचित् कार्ये परिश्रान्तो निशि गाढं प्रसुप्तः । तदनन्तरं तद्गृहद्रव्याणि हर्तुं चौरः प्रविष्टः । तस्य प्रांगणे गर्दभो बद्धस्तिष्ठति । कुक्कुरश्चोपविष्टोऽस्ति । अथ गर्दभः श्वानमाह—'सखे, भवतस्तावदयं व्यापारः । तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि । कुक्कुरो ब्रूते—'भद्र, मम नियोगस्य चर्चा त्वया न कर्तव्या । त्वमेव किं न जानासि यथा तस्याहर्निशं गृहरक्षां करोमि । यतोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति तेनाधुनापि ममाहारदाने मन्दादरः । यतो विना विधुरदर्शनं स्वामिन उपजीविषु मन्दादराः भवन्ति ।' गर्दभो ब्रूते—'शृणु रे बर्बर,

याचते कार्यकाले यः स किंभृत्यः स किंसुहृत् ।'

कुक्कुरो ब्रूते—

'भृत्यान्संभाषयेद्यस्तु कार्यकाले स किंप्रभुः ॥ १२ ॥

ततो गर्दभः सकोपमाह—'अरे दुष्टमते, पापीयांस्त्वं यद्विपत्तौ स्वामिकार्ये उपेक्षां करोषि । भवतु तावत् । यथा स्वामी जागरिष्यति तथा मया कर्तव्यम् ।

इत्युक्त्वातीव चीत्कारशब्दं कृतवान् । ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राभंगकोपादुत्थाय गर्दभं लगुडेन ताडयामास । तेनासौ पञ्चत्वमगमत् । अतोऽहं ब्रवीमि—'पराधिकारचर्चाम्' इत्यादि ॥ पश्य । पशूनामन्वेषणमेवास्मन्नियोगः । स्वनियोगचर्चा क्रियताम् । (विमृश्य) 'किन्त्वद्य तया चर्चया न प्रयोजनम् । यत आवयोर्भक्षितशेषाहारः प्रचुरोऽस्ति ।' दमनकः सरोषमाह—'कथमाहारार्थी भवान्केवलं राजानं सेवते । एतदयुक्तमुक्तं त्वया । यतः ।

सुहृदामुपकारकारणा-
द्द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधै-
र्जठरं को न बिभर्ति केवलम् ॥ १३ ॥

अपरमपि ।

अहितहितविचारशून्यबुद्धेः
श्रुतिसमयैर्बहुभिस्तिरस्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः
पुरुषपशोश्च पशोश्च को विशेषः' ॥ १४ ॥

करटको ब्रूते—'आवां तावदप्रधानौ । तदाप्यावयोः किमनया विचारणया ।' दमनको ब्रूते—कियता कालेनामात्याः प्रधानतामप्रधानतां वा लभन्ते । यतः ।

न कस्यचित्कश्चिदिह स्वभावा-
द्भवत्युदारोऽभिमतः खलो वा ।
लोके गुरुत्वं विपरीततां वा
स्वचेष्टितान्येव नरं नयन्ति ॥ १५ ॥

तद्भद्रम् । स्वयत्नायत्तो ह्यात्मा सर्वस्य । करटको ब्रूते—'अथ भवान्किं ब्रवीति ।' स आह—'अयं तावत्स्वामी पिंगलकः कुतोऽपि कारणात्सचकितः परिवृत्योपविष्टः ।' करटको ब्रूते—'किं तत्त्वं जानासि ।' दमनको ब्रूते—'किमत्राविदितमस्ति । उक्तं च ।

उदीरितोऽर्थः पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति नोदिताः ॥
अनुक्तमप्यूहति पण्डितो जनः
परेंगितज्ञानफला हि बुद्धयः ॥ १६ ॥

आकारैरिंगितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः ॥ १७ ॥

अत्र भयप्रस्तावे प्रज्ञाबलेनाहमेनं स्वामिनमात्मीयं करिष्यामि ।

करटको ब्रूते—'सखे, त्वं सेवानभिज्ञः । पश्य ।

अनाहूतो विशेद्यस्तु, अपृष्टो बहु भाषते ।
आत्मानं मन्यते प्रीतं भूपालस्य स दुर्मतिः' ॥ १८ ॥

दमनको ब्रूते—'भद्र, कथमहं सेवानभिज्ञः । पश्य ।

किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम् ॥ ~~१९~~ ॥
यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम् ॥१९

यतः ।

यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ २० ॥

करटको ब्रूते—'कदाचित्त्वामनवसरप्रवेशादवमन्यते स्वामी' । स चाह 'अस्त्वेवम् । तथाप्यनुजीविना स्वामिसान्निध्यमवश्यं करणीयम् । यतः ।

दोषभीतेरनारम्भस्तत्कापुरुषलक्षणम् ।
कैरजीर्णभयाद्भ्रातर्भोजनं परिहीयते ॥ २१ ॥

पश्य।

आसन्नमेव नृपतिर्भजते मनुष्यं,
विद्याविहीनमकुलीनमसंगतं वा।
प्रायेण भूमिपतयः प्रमदा लताश्च
यत्पार्श्वतो वसति तं परिवेष्टयन्ति' ॥ २२ ॥

करटको ब्रूते—'अथ तत्र गत्वा किं वक्ष्यति भवान्' स आह—'शृणु। किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि।' करटको ब्रूते—'किंतज्ज्ञानलक्षणम्।' दमनको ब्रूते—'शृणु।

दूरादवेक्षणं हासः संप्रश्नेष्वादरो भृशम्।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ॥ २३ ॥

एतज्ज्ञात्वा यथाचाऽयं ममायत्तो भविष्यति तथा करिष्यामि।

यतः।

अपायसंदर्शनजां विपत्ति-
मुपायसंदर्शनजां च सिद्धिम्।
मेधाविनो नीतिविधिप्रयुक्तां
पुरः स्फुरन्तीमिव दर्शयन्ति ॥ २४ ॥

करटको ब्रूते—'तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि। यतः।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन्।
प्राप्नुयाद् बुद्ध्यवज्ञानमपमानं च शाश्वतम् ॥ २५ ॥

दमनको ब्रूते—'मित्र, मा भैषीः। नाहमप्राप्तावसरं वचनं वदिष्यामि।

यतः।

आपद्युन्मार्गगमने कार्यकालात्ययेषु च।
अपृष्टेनापि वक्तव्यं भृत्येन हितमिच्छता ॥ २६ ॥

यदि प्रामावसरेणापि मया मन्त्रो न वक्तव्यस्तदा मन्त्रित्वमेव ममानुपपन्नम् । यतः ।

कलयति येन वृत्तिं येन च लोके प्रशस्यते सद्भिः ।
स गुणस्तेन च गुणिना रक्ष्यः संवर्धनीयश्च ॥ २७ ॥

तद्भद्र, अनुजानीहि माम् । गच्छामि ।' करटको ब्रूते—, शुभमस्तु । शिवास्ते पन्थानः । यथाभिलषितमनुष्ठीयताम्' इति । ततो दमनको विस्मित इव पिंगलकसमीपं गतः ।

अथ दूरादेव सादरं राज्ञा प्रवेशितः साष्टांगप्रणिपातं प्रणिपत्योपविष्टः । राजाह—'चिराद्दृष्टोऽसि' । दमनको ब्रूते—'यद्यपि मया सेवकेन श्रीमद्देवपादानां न किंचित्प्रयोजनमस्ति तथापि प्राप्तकालमनुजीविना सांनिध्यमवश्यं कर्तव्यमित्यायातोऽस्मि ।

यद्यपि चिरेणावधीरितस्य देवपादैर्मे बुद्धिनाशः शंक्येत, तदपि न शंकनीयम् यतः ।

कदर्थितस्यापि हि धैर्यवृत्ते-
र्बुद्धेर्विनाशो नहि शंकनीयः ।
अधः कृतस्यापि तनूनपातो
नाधः शिखा याति कदाचिदेव ॥ २८ ॥

देव, तत्सर्वथा विशेषज्ञेन स्वामिना भवितव्यम् । यतः ।

मणिर्लुठति पादेषु, काचः शिरसि धार्यते ।
यथैवास्ते तथैवास्तां, काचः काचो मणिर्मणिः ॥ २९ ॥

यतः ।

स्थान एव नियोज्यन्ते भृत्याश्चाभरणानि च ।
न हि चूडामणिः पादे नूपुरं शिरसा कृतम् ॥ ३० ॥

अपि च ।

बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न प्रदीपस्य प्रकाशनम्' ॥ ३१ ॥

पिंगलकोऽवदत—'भद्र दमनक, किमेतत् । त्वमस्मदीयप्रधानामात्यपुत्र इयन्तं कालं यावत्कुतोऽपि खलवाक्यान्नागतोऽसि । इदानीं यथाभिमतं ब्रूहि ।' दमनको ब्रूते—'देव, पृच्छामि किंचित् । उच्यताम् । उदकार्थी स्वामी पानयमपीत्वा किमिति विस्मित इव तिष्ठति ।' पिंगलकोवदत्—भद्रमुक्तं त्वया । किंत्वेतद्रहस्यं वक्तुं काचिद्विश्वासभूमि नास्ति तथापि निभृतं कृत्वा कथयामि । शृणु । संप्रति वनमिदमपूर्वसत्वाधिष्ठित मतोऽस्माकं त्याज्यम् । अनेन हेतुना विस्मितोऽस्मि । तथा च श्रुतो मयापि महानपूर्वशब्दः । शब्दानुरूपेणास्य प्राणिनो महता बलेन भवितव्यम् । दमनको ब्रूते—देव, अस्ति तावदयं महान्भयहेतुः । स शब्दोऽस्माभिरप्याकर्णितः । किंतु स किमन्त्री यः प्रथमं भूमित्यागं पश्चाद्युद्धं चोपदिशति । अस्मिन्कार्यसंदेहे भृत्यानामुपयोग एव ज्ञातव्यः । सिंहो ब्रूते—'भद्र' महती शंका मां बाधते ।' दमनकः पुनराह स्वगतम्—'अन्यथा' राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां संभाषसे ।' प्रकाशं ब्रूते—'देव, यावदहं जीवामि तावद्भयं न कर्तव्यम् । किंतु करटकादयोऽप्याश्वास्यन्तां यस्मादापत्प्रतीकारकाले दुर्लभः पुरुषसमवायः ।'

ततस्तौ दमनककरटकौ राज्ञा सर्वस्वेनापि पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ । करटको गच्छन्दमनकमाह—'सखे, किं शक्यप्रतीकारो भयहेतुरशक्यप्रतीकारो वेति न ज्ञात्वा, भयोपशमं प्रतिज्ञाय कथमयं महाप्रसादो गृहीतः । यतोऽनुपकुर्वाणो न कस्याप्युपायनं गृह्णीयाद्विशेषतो राज्ञः । पश्य ।

यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ३२ ॥

यथा हि ।

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति' ॥ ३३ ॥

दमनको विहस्याह—'मित्र, तूष्णीमास्यताम् । ज्ञातं मया भयकारणम् । बलीवर्दनर्दितं तत् । वृषभाश्चास्माकमपि भक्ष्याः । किं पुनः सिंहस्य ।, करटको ब्रूते—यद्येव तदा किं पुनः स्वामित्रासस्तत्रैव किमिति नापनीतः । दमनको ब्रूते—'यदि स्वामित्रासस्तत्रैव मुच्यते तदा कथमयं महासत्वलाभः स्यात् । अपरं च ।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन ।
निरपेक्ष प्रभुकृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ ३४ ॥

करटकः पृच्छति—'कथमेतत् ।, दमनकः कथयति—

कथा ३

अस्त्युत्तरापथेऽर्बुदशिखरनाम्नि पर्वते दुर्दान्तो नाम महाविक्रमः सिंहः । तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं कश्चिन्मूषकः प्रत्यहं छिनत्ति । ततः केसराग्रं लूनं दृष्ट्वा कुपितो विवरान्तर्गतं मूषकमलभमानोऽचिन्तयत्—

'क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते ।
तमाहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ ३५ ॥

इत्यालोच्य तेन ग्रामं गत्वा विश्वासं कृत्वा दधिकर्णनामा विडालो यत्नेनानीय मांसाहारं दत्वा स्वकन्दरे स्थापितः । अनन्तरं तद्भयान्मूषकोऽपि बिलान्न निःसरति । तेनासौ सिंहोऽक्षतकेसरः सुखं स्वपिति । मूषकशब्दं यदा यदा शृणोति तदा तदा मांसाहारदानेन तं बिडालं संवर्धयति ।

अथैकदा स मूषकः क्षुधापीडितो बहिः संचरन्विडालेन प्राप्तो व्यापादितश्च । अनन्तरं स सिंहोऽनेककालं यावन्मूषकं न पश्यति

तावत् किमपि न शृणोति तदा तस्यानुपयोगाद्विडालस्याप्याहारदाने मन्दादरो बभूव । ततोऽसावाहारविरहाद्दुर्बलो दधिकर्णोऽवसन्नो बभूव । अतोऽहं ब्रवीमि—'निरपेक्षो न कर्तव्यः' इत्यादि ।। ततो दमनककरटकौ संजीवकसमीपं गतौ । तत्र करटकस्तरुतले साटोपमुपविष्टः ।

दमनकः संजीवकसमीपं गत्वाब्रवीत्—'अरे वृषभ, एषोऽहं राज्ञा पिंगलकेनारण्यरक्षार्थं नियुक्तः । सेनापतिः करटकः समाज्ञापयति—'सत्वरमागच्छ । न चेदस्मदरण्याद्दूरमपसर । अन्यथा ते विरुद्धं फलं भविष्यति । न जाने क्रुद्धः स्वामी किं विधास्यति ।' तच्छ्रुत्वा संजीवकश्चायात् ।

आज्ञाभंगो नरेन्द्राणां ब्राह्मणानामनादरः ।
पृथक्शय्या च नारीणामशस्त्रविहितो वधः ।। ३६ ।।

ततो देशव्यवहारानभिज्ञः संजीवकः सभयमुपसृत्य साष्टांगपातं करटकं प्रणतवान् ।

अथ संजीवकः साशंकमाह—'सेनापते, किं मया कर्तव्यम् । तदभिधीयताम् ।' करटको ब्रूते—'वृषभ, अत्र कानने तिष्ठसि । अस्मद्देवपादारविन्दं प्रणम ।' संजीवको ब्रूते—'तदभयवाचं मे यच्छ । गच्छामि ।' करटको ब्रूते—'शृणु रे बलीवर्द, अलमनया शंकया । यतः ।

प्रतिवाचमदत्त केशवः
शपमानाय न चेदिभूभुजे ।
अनुहुंकुरुते घनध्वनिं
न हि गोमायुरुतानि केसरी ।। ३७ ।।

अन्यच्च । (सुन्दरीवृत्तम्)

तृणानि नोन्मूलयति प्रभंजनो
मृदूनि नीचैः प्रणतानि सर्वतः ।

सद्योच्छ्रितानेव तरून्प्रबाधते
महान्महत्येव करोति विक्रमम् ॥ ३८ ॥

ततस्तौ संजीवकं कियद्दूरे संस्थाप्य पिंगलकसमीपं गतौ।

ततो राज्ञा सादरमवलोकितौ, प्रणम्योपविष्टौ। राजाह—'त्वया स दृष्टः।' दमनको ब्रूते—'देव, दृष्टः। किंतु यद्देवेन ज्ञातं तत्तथा। महानेवासौ देव द्रष्टुमिच्छति। किन्तु महाबलोऽसौ ततः सज्जीभूयोपविश्य दृश्यताम्। शब्दमात्रादेव न भेतव्यम्। तथा चोक्तम्—

शब्द मात्रान्नभेतव्यमज्ञात्वाशब्दकारणम्।
शब्दहेतुं परिज्ञाय कुट्टनी गौरवं गता ॥ ३९ ॥

राजाह—'कथमेतत्।' दमनकः कथयति—

कथा ४।

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम्। तच्छिखरप्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते। एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः। तत्पाणिपतिता घण्टा वानरैः प्राप्ता। वानरास्तां घण्टामनुक्षणं वादयन्ति। ततो नगरजनैः स मनुष्यः खादितो दृष्टः प्रतिक्षणं घण्टारवश्च श्रूयते। अनन्तरं घण्टाकर्णः कुपितो मनुष्यान्खादति घण्टां च वादयतीत्युक्त्वा सर्वे जना नगरात्पलायिताः। ततः कराल्या नाम कुट्टन्या विमृश्यानवसरोऽयं घण्टावादः। तत्किं मर्कटा घण्टां वादयन्तीति स्वयं विज्ञाय राजा विज्ञापितः—'देव, यदि कियद्धनोपक्षयः क्रियते, तदाहमेनं घण्टाकर्णं साधयामि।' ततो राज्ञा तस्यै धनं दत्तम्। कुट्टन्या च मण्डलं कृत्वा तत्र गणेशादिपूजागौरवं दर्शयित्वा स्वयं वानरप्रियफलान्यादाय वनं प्रविश्य फलान्याकीर्णानि। ततो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः कुट्टनी च घण्टां गृहीत्वा नगरमागता सर्वजनपूज्याभवत्। अतोऽहं ब्रवीमि—'शब्दमात्रान्न भेतव्यम्' इत्यादि ॥ ततः संजीवकमानीय दर्शनं कारितः। पश्चात्तत्र सः परमप्रीत्या निवसति।

अथ कदाचित्तस्य सिंहस्य भ्राता स्तब्धकर्णनामा सिंहः समागतः । तस्यातिथ्यं कृत्वा समुपवेश्य पिंगलकस्तदाहारार्थं पशुं हन्तुं चलितः । अत्रान्तरे संजीवको वदति—'देव, अद्य हतमृगाणां मांसानि क्व ।' राजाह—'दमनककरटकौ जानीतः ।' संजीवको ब्रूते 'ज्ञायतां किमस्ति नास्ति वा' सिंहो विमृश्याह—'नास्त्येव तत् ।' संजीवको ब्रूते—'कथमेतावन्मांसं ताभ्यां खादितम् ।' राजाह 'खादितं व्ययितमवधीरितं च । प्रत्यहमेष क्रमः ।' संजीवको ब्रूते—'कथं श्रीमद्देवपादानामगोचरेणैवं क्रियते ।' अथ संजीवको ब्रूते—'नैतदुचितम् । तथा चोक्तम्—

नानिवेद्य प्रकुर्वीत भर्तुः किंचिदपि स्वयम् ।
कार्यमापत्प्रतीकारादन्यत्र जगतीपते ॥ ४१ ॥

एतच्च राज्ञः प्रधानं दूषणम्—

अतिव्ययोऽनवेक्षा च तथार्जनमधर्मतः ।
मोषणं दूरसंस्थानां कोशव्यसनमुच्यते ॥ ४१ ॥

यतः ।

क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया ।
परिक्षीयत एवासौ धनी वैश्रवणोपमः' ॥ ४२ ॥

स्तब्धकर्णो ब्रूते—'शृणु भ्रातः, चिराश्रितावेतौ दमनककरटकौ संधिविग्रहकार्याधिकारिणौ च कदाचिदर्थाधिकारे न नियोक्तव्यौ । अपरं च नियोगप्रस्तावे यन्मया श्रुतं तत्कथ्यते ।

ब्राह्मणः क्षत्रियो बन्धुर्नाधिकारे प्रशस्यते ।
ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति ॥ ४३ ॥
प्राप्तार्थग्रहणं द्रव्यपरीवर्तोऽनुरोधनम् ॥ ४४ ॥
उपेक्षा बुद्धिहीनत्वं भोगोऽमात्यस्य दूषणम् ॥ ४५ ॥

एतत्सर्वं यथावसरं ज्ञात्वा व्यवहर्तव्यम् ।' सिंहो ब्रूते—'अस्तितावदेवम् किंत्वेतौ सर्वथा मम वचनकारिणौ । स्तब्धकर्णो ब्रूते—तत्सर्वमनुचितं सर्वथा । यतः ।

आज्ञाभंगकरान्राजा न क्षमेत्स्वसुतानपि ।
विशेषः को नु राज्ञश्च राज्ञश्चित्रगतस्य च ॥ ४६ ॥

अतः, सर्वथास्मद्वचनं क्रियताम् । व्यवहारोऽप्यस्माभिः कृत एव । अयं संजीवकः सस्यभक्षकोऽर्थाधिकारे नियुज्यताम् ।' एतद्वचनात्तथानुष्ठिते सति तदारभ्य पिंगलकसंजीवकयोः सर्वबन्धुपरित्यागेन महता स्नेहेन कालोऽतिवर्तते । ततोऽनुजीविनामप्याहारदाने शैथिल्यदर्शनाद्दमनककरटकावन्योन्यं चिन्तयतः । तत्राह दमनकः करटकम्—'मित्र, किं कर्तव्यम् । आत्मकृतोऽयं दोषः । स्वयं कृतेऽपि दोषे परिदेवनमथानुचितम् । (क्षणं विमृश्य) मित्र यथाऽनयोः सौहार्दं मयाकारितं तथा भेदोऽपि मया कार्यः ।

करटको ब्रूते—'अस्त्वेवम् । किंत्वनयोर्महानन्योन्यनिसर्गोपजातस्नेहस्तथा चोक्तम्—

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥ ४७ ॥

करटकः पृच्छति—कथमेतत् ।' दमनकः कथयति—

कथा ४।

कस्मिंश्चित्तरौ वायसदम्पती निवसतः । तयोश्चापत्यानि तत्कोटरावस्थितेन कृष्णसर्पेण खादितानि । ततः पुनर्गर्भवती वायसी वायसमाह

'नाथ, त्यज्यतामयं तरुः। अत्रावस्थितकृष्णसर्पेणावयोः संततिः सततं भक्ष्यते। यतः

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।
ससर्पे च गृहे वासो मृत्युरेव न संशयः' ॥ ४८ ॥

वायसो ब्रूते—प्रिये, न भेतव्यम्। वारंवारं मयैतस्य महापराधः सोढः। इदानीं पुनर्न क्षन्तव्यः। वायस्याह—'अलमनया शङ्कया। यतः।

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः' ॥ ४९ ॥

वायसी विहस्याह—कथमेतत्।' वायसः कथयति—

कथा ५।

अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। स च सर्वदा पशूनां वधं कुर्वन्नास्ते। ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः—'मृगेन्द्र, किमर्थमेकदा बहुपशुघातः क्रियते। यदि प्रसादो भवति तदा वयमेव भवतामाहाराय प्रत्यहमेकं पशुमुपढौकयामः।' ततः सिंहेनोक्तम्—यद्येतदभिमतं भवतां तर्हि भवतु तत्।' ततः प्रभृत्येकैकं पशुमुपकल्पितं भक्षयन्नास्ते। अथ कदाचिद्वृद्धशशकस्य वारः समायातः। सोऽचिन्तयत्—

'त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ ५० ॥

तन्मन्दं मन्दं गच्छामि। ततः सिंहोऽपि क्षुधापीडितः कोपात्तमुवाच—'कुतस्त्वं विलम्ब्य समागतोऽसि।' शशकोऽब्रवीत्—'देव, नाहमपराधी। आगच्छन्पथि सिंहान्तरेण बलाद्धृतः। तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतोऽस्मि।'

सिंहः सकोपमाह—'त्वरं गत्वा दुरात्मानं दर्शय क्व स दुरात्मा तिष्ठति ।' ततः शशकस्तं गृहीत्वा सपदि गत्वा कूपमेकमाजगाम । तत्रागत्य 'स्वयमेव पश्यतु स्वामी' त्युक्त्वा तस्मिन्कूपजले तस्य सिंहस्यैव बिम्बं दर्शितवान् । ततोऽसौ क्रोधाध्मातो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः । अतोऽहं ब्रवीमि—बुद्धिर्यस्य, इत्यादि ॥ वायस्याह—'श्रुतं मया सर्वम् । संप्रति यथा कर्तव्यं तद् ब्रूहि ।' वायसोऽवदत्—'अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति । स्नानसमये तदङ्गादवतारितं तीर्थशिलानिहितं कनकसूत्रं चञ्च्वा विधृत्यानीयास्मिन्कोटरे धारयिष्यसि ।' अथ कदाचित्स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितम् । अथ कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैस्तत्र तरुकोटरे कृष्णसर्पो दृष्टो व्यापादितश्च अतोऽहं ब्रवीमि—'उपायेन हि यच्छक्यम्' इत्यादि ॥ करटको ब्रूते—'यद्येवं तर्हि गच्छ । शिवास्ते सन्तु पन्थानः ।' ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच—'देव, आत्यायिकं किमपि महाभयकारिकार्यं मन्यमानः समागतोऽस्मि । यतः ।

आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
कल्याणवचनं ब्रूयादपृष्टोऽपि हितं नरः ॥ ५१ ॥

अन्यच्च ।

भोगस्य भाजनं राजा न राजा कार्यभाजनम् ।
राजकार्यपरिध्वंसी मन्त्री दोषेण लिप्यते ॥ ५२ ॥

तथा हि पश्य । अमात्यानामेष क्रमः ।

वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ।
न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणम् ॥ ५३ ॥

पिङ्गलकः सादरमाह—'अथ भवान्किं वक्तुमिच्छति।' दमनको ब्रूते—'देव, संजीवकस्तवोपर्यसदृशव्यवहारीव लक्ष्यते। यथा चास्मत्संनिधाने श्रीमद्देवपादानां शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति।' एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं मत्वा तूष्णीं स्थितः। दमनकः पुनराह—'देव, सर्वामात्यपरित्यागं कृत्वैक एवायं यस्त्वया सर्वाधिकारी कृतः स एव दोषः। यतः।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च
विष्टभ्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य
तयोर्द्वयोरेकतरं जहाति ॥ ५४ ॥

अपरं च।

एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहाच्छ्रयते मदः स च मदालस्येन निर्भिद्यते।
निर्भिन्नस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणान्तिकं द्रुह्यति ॥ ५५ ॥

अन्यच्च—

विषदिग्धस्य भक्तस्य दन्तस्य चलितस्य च।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥ ५६ ॥

स हि सर्वकार्येषु स्वेच्छातः प्रवर्तते। तदत्र प्रमाणं स्वामी। एतच्च भवान् जानात्येव यत् 'न सोऽस्ति पुरुषो लोके यो न कामयते श्रियम्' इति।

सिंहो विमृश्याह—'भद्र' यद्यप्येवं तथापि संजीवकेन सह मम महान्स्नेहः। पश्य।

कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।

अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥ ५७ ॥

अन्यच्च ।

अप्रियाण्यपि कुर्वाणो यः प्रियः प्रिय एव सः

दग्धमन्दिरसारेऽपि कस्य वह्नावनादरः' ॥ ५८ ॥

दमनकः पुनरेवाह—'देव, स एवातिदोषः' । यतः ।

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।

सुतेऽमात्ये ऽप्युदासीने स लक्ष्म्याश्रीयते जनः ॥ ५९ ॥

शृणु देव,

अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।

वक्ता श्रोता च यत्रास्ति रमन्ते तत्र संपदः ॥ ६० ॥

त्वया च मूलभृत्यानपास्यायमागन्तुकः पुरस्कृतः । एतच्चानुचितं कृतम् । यतः—

मूलभृत्यान्परित्यज्य नागन्तून्प्रतिमानयेत् ।

नातः परतरो दोषो राज्यभेदकरो यतः ॥ ६१ ॥

सिंहो ब्रूते—'किमाश्चर्यम् । मया यदभयवाचं दत्त्वानीतः संवर्धितश्च तत्कथं मह्यं द्रुह्यति ।' दमनको ब्रूते—'देव,

दुर्जनो नार्जवं याति सेव्यमानोऽपि नित्यशः ।

स्वेदनाभ्यञ्जनोपायैः श्वपुच्छमिव नामितम् ॥ ६२ ॥

अतोऽहं ब्रवीमि—

'अपृष्टोऽपि हितं ब्रूयाद्यस्य नेच्छेत्पराभवम् ।

एष एव सतां धर्मो विपरीतमतोऽन्यथा ॥ ६३ ॥

यदि संजीवकव्यसनार्दितो विज्ञापितोऽपि स्वामी न निवर्तते तदीदृशि भृत्ये न दोषः ।

पिंगलकः (स्वगतम् ।)

न परस्यापराधेन परेषां दण्डमाचरेत् ।
आत्मनावगतं कृत्वा बध्नीयात्पूजयेच्च वा ॥ ६४ ॥

तथा चोक्तम् ।

गुणदोषावनिश्चित्य विधिर्न ग्रहनिग्रहे ।
स्वनाशाय यथा न्यस्तो दर्पात्सर्पमुखे करः ॥ ६५ ॥

प्रकाशं ब्रूते—'तदा संजीवकः किं प्रत्यादिश्यताम् ।' दमनकः ससंभ्रममाह—'देव, मा मैवम् । एतावता मन्त्रभेदो जायते । तथा ह्युक्तम्—

मन्त्रबीजमिदं गुप्तं रक्षणीयं यथा तथा ।
मनागपि न भिद्येत तद्भिन्नं न प्ररोहति ॥ ६६ ॥

किं च ।

आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ६७ ॥

तदवश्यं समारब्धं महता प्रयत्नेन संपादनीयम् । यच्चासौ दृष्टदोषोऽपि दोषान्निवर्त्य संधातव्यस्तदतीवानुचितम् । यतः ।

सकृद्दुष्टं तु यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा' ॥ ६८ ॥

सिंहो ब्रूते—'ज्ञायतां तावत्किमस्माकमसौ कर्तुं समर्थः ।' दमनक आह—'देव,

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः' ॥ ६९ ॥

सिंहः पृच्छति—'कथमेतत् ।' दमनकः कथयति—

कथा ६

दक्षिणसमुद्रतीरे टिट्टिभदंपती निवसतः । तत्र चासन्नप्रसवा टिट्टिभी भर्तारमाह—'नाथ, प्रसवयोग्यस्थानं निभृतमनुसंधीयताम्' इति । टिट्टिभोऽवदत् भार्ये, नन्विदमेव स्थानं प्रसूतियोग्यम् । सा ब्रूते—'समुद्रवेलया व्याप्यते स्थानमेतत् ।' टिट्टिभोऽवदत्—'किमहं निर्बलः समुद्रेण निग्रहीतव्यः ।' टिट्टिभी विहस्याह—स्वामिन्, त्वया समुद्रेण च महदन्तरम् । अथवा ।

परिभवं परिच्छेत्तुं योग्यायोग्यं च वेत्ति यः ।
अस्तीह यस्य विज्ञानं कृच्छ्रेणापि न सीदति ॥ ७२ ॥

अपि च ।

अनुचितकार्यारम्भः स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि' ॥ ७१ ॥

ततः कृच्छ्रेण स्वामिवचनात्सा तत्रैव प्रसूता । एतत्सर्वं श्रुत्वा समुद्रेणापि तच्छक्तिज्ञानार्थं तदण्डान्यपहृतानि । ततष्टिट्टिभी शोकार्ता भर्तारमाह—'नाथ, कष्टमापतितम् । तान्यण्डानि मे नष्टानि ।' टिट्टिभोऽवदत्—'प्रिये, मा भैषीः ।' इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गतः । तत्र गत्वा सकलवृत्तान्तं टिट्टिभेन भगवतो गरुडस्य पुरतो निवेदितम्—'देव, समुद्रेणाहं स्वगृहावस्थितो विनापराधेनैव निगृहीतः ।' ततस्तद्वचनमाकर्ण्य गरुत्मता प्रभुर्भगवान्नारायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञप्तः । स समुद्रमण्डदानायादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण तान्यण्डानि टिट्टिभाय समर्पितानि । अतोऽहं ब्रवीमि—'अङ्गाङ्गिभावमज्ञात्वा' इत्यादि ॥ राजाह—'कथमसौ ज्ञातव्यो द्रोहबुद्धिरिति ।' दमनको ब्रूते—'यदासौ सदर्पः शृङ्गाग्रप्रहर-

णाभिमुखश्चकित इवागच्छति तदा ज्ञास्यति स्वामी ।' एवमुक्त्वा संजीवकसमीपं गतः । तत्र गतश्च मन्दं मन्दमुपसर्पन्विस्मितमिवात्मानमदर्शयत् । संजीवकेन सादरमुक्तम्—'भद्र, कुशलं ते ।' दमनको ब्रूते—'अनुजीविनां कुतः कुशलम् । यतः ।

संपत्तयः पराधीनाः सदा चित्तमानिर्वृतम् ।
स्वजीवितेऽप्यविश्वासस्तेषां ये राजसेवकाः ॥ ७२ ॥

संजीवकेनोक्तम्—'सखे, ब्रूहि किमेतत् ।' दमनक आह—'किं ब्रवीमि मन्दभाग्यः । पश्य ।

मज्जन्नपि पयोराशौ लब्ध्वा सर्पावलम्बनम् ।
न मुञ्चति न चादत्ते तथा मुग्धोऽस्मि संप्रति ॥ ७३ ॥

यतः ।

एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे' ॥ ७४ ॥

इत्युक्त्वा दीर्घं निःश्वस्योपविष्टः । संजीवको ब्रूते—'मित्र, तथापि सविस्तरं मनोगतमुच्यताम् ।' दमनकः सुनिभृतमाह—'यद्यपि राजविश्वासो न कथनीयस्तथापि भवानस्मदीयप्रत्ययादागतः । मया परलोकार्थिनावश्यं तव हितमाख्येयम् । शृणु । अयं स्वामी ममोपरि विकृतबुद्धी रहस्युक्तवान्—'संजीवकमेव हत्वा स्वपरिवारं तर्पयामि ।' एतच्छ्रुत्वा संजीवकः परं विषादमगमत् । दमनकः पुनराह—'अलं विषादेन । प्राप्तकालं कार्य्यमनुष्ठीयताम् ।' संजीवकः क्षणं विमृश्याह स्वगतम्—'सुष्ठु खल्विदमुच्यते । किं वा दुर्जनचेष्टितं न वेत्येतद्व्यवहारान्निर्णेतुं न शक्यते ।

कुतः—

'अभक्तभक्ता विद्वांसः प्रायेणापात्रभृद्भवन्ति राजानः ।
कृपणानुसारि च धनं देवो गिरिजलधिवर्षी च ॥ ७५ ॥

ततो विचिन्त्योक्तम् । कष्टं किमिदमापतितम् । यतः ।

आराध्यमानो नृपतिः प्रयत्ना-
न्न तोषमायाति किमत्र चित्रम् ।
अयं त्वपूर्वप्रतिमाविशेषो
यः सेव्यमानो रिपुतामुपैति ॥ ७६ ॥

तदयमशक्यार्थः प्रमेयः । यतः ।

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि तु यस्य मानसं
कथं जनस्तं परितोषयिष्यति ॥ ७७ ॥

किं मयापकृतं राज्ञः । अथवा निर्निमित्तापकारिणश्च भवन्ति राजानः ।'

दमनको ब्रूते—'एवमेतत् । शृणु ।

विज्ञैः स्निग्धैरुपकृतमपि द्वेष्यतामेति कैश्चि-
त्साक्षादन्यैरपकृतमपि प्रीतिमेवोपयाति ।
चित्रं चित्रं किमथ चरितं नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ७८ ॥

अयं तावत्स्वामी वाचि मधुरो विषहृदयश्चेति ज्ञातः । यतः ।

दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तादरः ।
अन्तर्भूतविषो बहिर्मधुमयश्चातीव मायापटुः

को नाम यमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥ ७९ ॥

तथा हि ।

पोतो दुस्तरवारिराशितरणे दीपोऽन्धकारागमे
निर्वाते व्यजनं मदान्धकरिणां दर्पोपशान्त्यै सृणिः ।
इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः' ॥ ८० ॥

संजीवकः पुनर्निःश्वस्य—'कष्टं भोः । कथमहं सस्यभक्षकः सिंहेन निपातयितव्यः । यतः ।

ययोरेव समं वित्तं ययोरेव समं बलम् ।
तयोर्विवादो मन्तव्यो नोत्तमाधमयोः क्वचित् ॥ ८१ ॥

(पुनर्विचिन्त्य ।) न जाने केनायं राजा ममोपरि विकारितः । भेदमुपगताद्राज्ञः सदा भेतव्यम् ।

वज्रं च राजतेजश्च द्वयमेवातिभीषणम् ।
एकमेकत्र पतति पतत्यन्यत्समन्ततः ॥ ८२ ॥

ततः संग्रामे मृत्युरेव वरम् । इदानीं तदाज्ञानुवर्तनमयुक्तम् । यतः ।

मृतः प्राप्नोति वा स्वर्गं शत्रुं हत्वा सुखानि वा ।
उभावपि हि शूराणां गुणावेतौ सुदुर्लभौ ॥ ८३ ॥

युद्धकालश्चायम् ।

यत्रायुद्धे ध्रुवं मृत्युर्युद्धे जीवितसंशयः ।
तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥ ८४ ॥

यतः ।

जये हि लभते लक्ष्मीं मृतेनापि परंपदम् ।
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे' ॥ ८५ ॥

एतच्चिन्तयित्वा संजीवक आह—'भो मित्र, कथमसौ मां जिघांसुर्ज्ञातव्यः।' दमनको ब्रूते—'यदासौ पिंगलकः समुन्नतलाङ्गूल उन्नतचरणो विवृतास्यस्त्वां पश्यति तदा त्वमेव स्वविक्रमं दर्शयिष्यसि। किंतु सर्वमेतत्सुगुप्तमनुष्ठातव्यम्। नोचेन्न त्वं नाहम्।' इत्युक्त्वा दमनकः करटकसमीपं गतः। करटकेनोक्तम्—'किं निष्पन्नम्।' दमनकेनोक्तम्—'निष्पन्नोऽसावन्योन्यभेदः।' करटको ब्रूते—'कोऽत्र संदेहः। यतः।

बन्धुः को नाम दुष्टानां कुप्यते को न याचितः।
को न दृप्यति वित्तेन कुकृत्ये को न पण्डितः॥ ८६॥

ततो दमनकः पिंगलकसमीपं गत्वाह—देव, समागतोऽसौ पापाशयः। ततः सज्जीभूय स्थीयताम्' इत्युक्त्वा पूर्वोक्ताकारं कारयामास। संजीवकोऽप्यागत्य तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार। ततस्तयोर्युद्धे संजीवकः सिंहेन व्यापादितः।

अथ संजीवकं सेवकं पिंगलको व्यापाद्य विश्रान्तः सशोक इव तिष्ठति। ब्रूते च—'किं मया दारुणं कर्म कृतम्। यतः।

परैः संभुज्यते राज्यं स्वयं पापस्य भाजनम्।
धर्मातिक्रमतो राजा सिंहो हस्तिवधादिव॥ ८७॥

अपरं च।

भूम्येकदेशस्य गुणान्वितस्य
भृत्यस्य वा बुद्धिमतः प्रणाशः।
भृत्यप्रणाशो मरणं नृपाणां
नष्टापि भूमिः सुलभा न भृत्याः॥ ८८॥

दमनको ब्रूते—'स्वामिन्, कोऽयं नूतनो न्यायो यदरातिं हत्वा संतापः क्रियते। तथा चोक्तम्—

पिता वा यदि वा भ्राता पुत्रो वा यदि वा सुहृत् ।
प्राणच्छेदकरा राज्ञा हन्तव्या भूतिमिच्छता ॥ ८९ ॥

इति दमनकेन संतोषितः पिङ्गलकः स्वां प्रकृतिमापन्नः सिंहासने समुपविष्टः । दमनकः प्रहृष्टमनाः 'विजयतां महाराजः । शुभमस्तु सर्वजगताम्' इत्युक्त्वा यथासुखमवस्थितः ॥

विष्णुशर्मोवाच—'सुहृद्भेदः श्रुतस्तावद्भवद्भिः ।' राजपुत्रा ऊचुः—'भवत्प्रसादाच्छ्रुतः । सुखिनो भूता वयम्', विष्णुशर्माब्रवीत्—अपरमपीदमस्तु—

सुहृद्भेदस्तावद्भवतु भवतां शत्रुनिलये
खलः कालाकृष्टः प्रलयमुपसर्पत्वहरहः ।
जनो नित्यं भूयात्सकलसुखसंपत्तिवसतिः
कथारम्भे रम्ये सततमिह बालोऽपि रमताम् ॥ ९० ॥

इति हितोपदेशे सुहृद्भेदो नाम द्वितीयः कथासंग्रहः समाप्तः ।

ता. २६ अक्टूबर सन् ५६ को [illegible] हितोपदेश की प्रथमावृत्ति समाप्त की

विग्रहः ।

पुनः कथारम्भकाले राजपुत्रा ऊचुः—'आर्य्य, राजपुत्रा वयम् । तद्विग्रहं श्रोतुं नः कुतूहलमस्ति ।' विष्णुशर्मणोक्तम्— 'यदेवं भवद्भ्यो रोचते कथयामि । विग्रहः श्रूयतां यस्यायमाद्यः श्लोकः—

हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे ।
विश्वास्य वञ्चिता हंसाः काकैः स्थित्वारिमन्दिरे' ॥ १ ॥

राजपुत्रा ऊचुः—'कथमेतत् ।' विष्णुशर्मा कथयति—

अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः । तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति । स च सर्वैर्जलचरपक्षिभिर्मिलित्वा पक्षिराज्ये ऽभिषिक्तः ।

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥ २ ॥

अपरं च ।

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम् ।
वर्धनाद्रक्षणं श्रेयस्तदभावे तदप्यसत् ॥ ३ ॥

एकदासौ राजहंसः सुविस्तीर्णकमलपर्यङ्के सुखासीनः परिवारपरिवृतस्तिष्ठति । ततः कुतश्चिद्देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः । राजोवाच—'दीर्घमुख, देशान्तरादागतोऽसि वार्तां कथय ।' स ब्रूते— देव, अस्ति महती वार्ता । तां वक्तुं सत्वरमागतोऽहम् । श्रूयताम् । अस्ति जम्बूद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति । तस्यानुचरैश्चरद्भिः पक्षिभिरहं दग्धारण्यमध्ये चरन्नवलोकितः पृष्टश्च—'कस्त्वम् । कुतः समागतोऽसि ।' तदा मयोक्तम्— कर्पूरद्वीपस्य राजचक्रवर्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरो-

ऽहम् । कौतुकाद्देशान्तरं द्रष्टुमायातोऽस्मि । एतच्छ्रुत्वा पक्षिभिरुक्तम्—अनयोर्देशयोः को देशो भद्रतरो राजा च ।' मयोक्तम्—'आः किमेवमुच्यते । महदन्तरम् । यतः कर्पूरद्वीपः स्वर्ग एव राजहंसश्च द्वितीयः स्वर्गपतिः । अत्र मरुस्थले पतिता यूयं किं कुरुथ । अस्मद्देशे गम्यताम् ।' ततोऽस्मद्वचनमाकर्ण्य सर्वे सकोपा बभूवुः । तथा चोक्तम्—

पयःपानं भुजंगानां केवलं विषवर्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ ४ ॥

अन्यच्च ।

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन ।
वानराननुपदिश्याथ स्थानभ्रष्टा ययुः खगाः' ॥ ५ ॥

राजोवाच—कथमेतत् ।' दीर्घमुखः कथयति—

कथा १

अस्ति नर्मदातीरे विशालः शाल्मलीतरुः । तत्र निर्मितनीडक्रोडे पक्षिणो निवसन्ति सुखेन । अथैकदा वर्षासु नीलपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव । ततो वानरांश्च तरुतलेऽवस्थिताञ्शीताकुलान्कम्पमानानवलोक्य कृपया पक्षिभिरुक्तम्—'भो भो वानराः, शृणुत ।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः ।
हस्तपादादिसंयुक्ता यूयं किमिति सीदथ' ॥ ६ ॥

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितम्—'अहो निर्वातनीडगर्भावस्थिताः सुखिनः पक्षिणोऽस्मान्निन्दन्ति । भवतु तावद्वृष्टेरुपशमः ।' अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नास्तेषामण्डानि चाधः पातितानि । अतोऽहं ब्रवीमि—'विद्वानेवोपदेष्टव्यः' इत्यादि ॥ राजोवाच—

'ततस्तैः किं कृतम्।' बकः कथयति—ततस्तैः पक्षिभिः कोपादुक्तम्—'केनासौ राजहंसो राजा कृतः।' ततो मयोपजातकोपेनोक्तम्—'युष्मदीयोऽयं केन राजा कृतः।' एतच्छ्रुत्वा ते सर्वे मां हन्तुमुद्यताः। ततो मयापि स्वविक्रमो दर्शितः।

राजा विहस्याह—

आत्मनश्च परेषां च यः समीक्ष्य बलाबलम्।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः॥ ७॥

अन्यच्च।

सुचिरं हि चरन्नित्यं क्षेत्रे सस्यमबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः॥ ८॥

बकः पृच्छति—'कथमेतत्।' राजा कथयति—

कथा २।

अस्ति हस्तिनापुरे विलासो नाम रजकः। तस्य गर्दभोऽतिवाहनाद्दुर्बलो मुमूर्षुरिवाभवत्। ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसमीपे सस्यक्षेत्रे नियुक्तः। ततो दूरात्तमवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते। अथैकदा केनापि सस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्यानतकायेनैकान्ते स्थितम्। तं च दूराद्दृष्ट्वा गर्दभः पुष्टाङ्गो यथेष्टसस्यभक्षणजातबलो गर्दभोऽयमिति मत्वोच्चैः शब्दं कुर्वाणस्तदभिमुखं धावितः। ततः सस्यरक्षकेण चीत्कारशब्दान्निश्चित्य गर्दभोऽयमिति लीलयैव व्यापादितः। अतोऽहं ब्रवीमि—'सुचिरं हि चरन्नित्यम्' इत्यादि॥ दीर्घमुखो ब्रूते—ततः पक्षिभिरुक्तम्—'अरे पाप दुष्ट बक, अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि।

तत्र गन्तव्यमिदानीम्' इत्युक्त्वा सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः—'पश्य रे मूर्ख, स हंसस्तव राजा सर्वथा मृदुः । तस्य राज्याधिकारो नास्ति । यत एकान्तमृदुः करतलस्थमप्यर्थं रक्षितुमक्षमः । स कथं पृथिवीं शास्ति राज्यं वा तस्य किम् । त्वं च कूपमण्डूकः । तेन तदाश्रयमुपदिशसि । शृणु ।

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात्फलं नास्ति छाया केन निवार्यते ॥ ९ ॥

अन्यच्च ।

हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः ।
पयोऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते ॥ १० ॥

महानप्यल्पतां याति निर्गुणे गुणविस्तरः ।
आधाराधेयभावेन गजेन्द्र इव दर्पणे ॥ ११ ॥

विशेषतश्च ।

व्यपदेशेऽपि सिद्धिः स्याद् तिशक्ते नराधिपे ।
शशिनो व्यपदेशेन शशकाः सुखमासते' ॥ १२ ॥

मयोक्तम्—'कथमेतत् ।' पक्षिणः कथयन्ति—

कथा ३

कदाचिदपि वर्षासु वृष्टेरभावात्तृषार्तो गजयूथो यूथपतिमाह:—'नाथ, कोऽभ्युपायोऽस्माकं जीवनाय । नास्ति क्षुद्रजन्तूनां निमज्जनस्थानात् । वयं च निमज्जनस्थानाभावान्मृतप्राया इव । किं कुर्मः । क्व यामः ।' ततो हस्तिराजो नातिदूरं गत्वा निर्मलह्रदं दर्शितवान् । ततो दिनेषु

गच्छन्तस्तु तत्तीरावस्थिता गजपादाहतिभिश्चूर्णिताः क्षुद्रशशकाः। अनन्तरं शिलीमुखो नाम शशकश्चिन्तयामास—अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागन्तव्यम्। अतो विनश्यत्यस्मत्कुलम्। ततो विजयो नाम वृद्धशशकोऽवदत्—'मा विषीदत। मयात्र प्रतीकारः कर्तव्यः ततोऽसौ प्रतिज्ञाय चलितः। गच्छता च तेनालोचितम्—'कथं गजयूथसमीपे स्थित्वा वक्तव्यम्। यतः।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः॥ १३॥

अतोऽहं पर्वतशिखरमारुह्य यूथनाथं संवादयामि।' तथानुष्ठिते यूथनाथ उवाच—'कस्त्वम्। कुतः समायातः।' स ब्रूते—'शशकोऽहम्। भगवता चन्द्रेण भवदन्तिकं प्रेषितः।' यूथपतिराह—'कार्यमुच्यताम्।' विजयो ब्रूते—

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा।
सदैवावध्यभावेन यथार्थस्य हि वाचकः॥ १४॥

यदहं तदाज्ञया ब्रवीमि। शृणु। यदेते चन्द्रसरोरक्षकाः शशकास्त्वया निःसारितास्तदनुचितं कृतम्। ते शशकाश्चिरमस्माकं रक्षिताः। अत एव मे शशांक इति प्रसिद्धिः।' एवमुक्तवति दूते यूथपतिर्भयादिदमाह—'प्रणिधे। इदमज्ञानतः कृतम्। पुनर्न कर्तव्यम्।' दूत उवाच—'यद्येवं तदत्र सरसि कोपात्कम्पमानं भगवन्तं शशांकं प्रणम्य प्रसाद्य गच्छ।' ततो रात्रौ यूथपतिं नीत्वा जले चञ्चलं चन्द्रबिम्बं दर्शयित्वा यूथपतिः प्रणामं कारितः। उक्तं च तेन—'देव, अज्ञानादनेनापराधः कृतः। ततः क्षम्यतामिदानीं। नैवमनन्तरं विधास्यते।' इत्युक्त्वा

प्रस्थापितः । अतोऽहं ब्रवीमि—'व्यपदेशेऽपि सिद्धिः स्यात्' इति ।
ततो मयोक्तम्—'स एवास्मत्प्रभू राजहंसो महाप्रतापोऽतिसमर्थः । त्रैलोक्यस्यापि प्रभुत्वं तत्र युज्यते किंपुनः राज्यम्' इति । तदाहं तैः पक्षिभिः 'दुष्ट, कथमस्मद्भूमौ चरसि' इत्यभिधाय राज्ञश्चित्रवर्णस्य समीपं नीतः । ततो राज्ञः पुरो मां प्रदर्श्य तैः प्रणम्योक्तम्—'देव, अवधीयतामेष दुष्टो बको यदस्मद्देशे चरन्नपि देवपादानधिक्षिपति ।' राजाह—'कोऽयम् । कुतः समायातः ।' त ऊचुः—हिरण्यगर्भनाम्नो राजहंसस्यानुचरः कर्पूरद्वीपादागतः ।' अथाहं गृध्रेण मन्त्रिणा पृष्टः—'कस्तत्र मुख्यो मन्त्री' इति । मयोक्तम्—'सर्वशास्त्रार्थपारगः सर्वज्ञो नाम चक्रवाकः । गृध्रो ब्रूते—'युज्यते । स्वदेशजोऽसौ । यतः ।

> स्वदेशजं कुलाचारं विशुद्धमथवा शुचिम् ।
> मन्त्रज्ञमव्यसनिनं व्यभिचारविवर्जितम् ॥ १५ ॥
> अधीतव्यवहारार्थं मौलं ख्यातं विपश्चितम् ।
> अर्थस्योत्पादकं चैव विदध्यान्मन्त्रिणं नृपः ॥ १६ ॥

अत्रान्तरे शुकेनोक्तम्—'देव, कर्पूरद्वीपा लघुद्वीपा जम्बुद्वीपान्तर्गता एव । तत्रापि देवपादानामेवाधिपत्यम् ।' ततो राज्ञाप्युक्तम्—'एवमेव । यतः ।

> राजा मत्तः शिशुश्चैव प्रमादी धनगर्वितः ।
> अप्राप्यमपि वाञ्छन्ति किं पुनर्लभ्यतेऽपि तत्' ॥१७॥

ततो मयोक्तम्—'यदि वचनमात्रेणैवाधिपत्यं सिद्ध्यति तदा जम्बुद्वीपेऽप्यस्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यमस्ति ।' शुको ब्रूते—'कथमत्र निर्णयः, मयोक्तम्—'संग्राम एव ।' राज्ञा विहस्योक्तम्—'स्वस्वामिनं

'गत्वा सञ्जीकुरु ।' तदा मयोक्तम्—'स्वदूतोऽपि प्रस्थाप्यताम् ।'
राजोवाच—'कः प्रयास्यति दौत्येन । यत एवंभूतो दूतः कार्यः ।

भक्तो गुणी शुचिर्दक्षः प्रगल्भोऽव्यसनी क्षमी ।
ब्राह्मणः परमर्मज्ञो दूतः स्यात्प्रतिभानवान् ॥ १८ ॥

गृध्रो वदति—'सन्त्येव दूता बहवः । किंतु ब्राह्मण एव कर्तव्यः ।
राजाह—'ततः शुक एव व्रजतु । शुक, त्वमेवानेन सह गत्वास्मदभिलषितं ब्रूहि ।' शुको ब्रूते—'यथाज्ञापयति देवः । किंत्वयं दुर्जनो बकः । तदनेन सह न गच्छामि । तथा चोक्तम्—

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत्सीतां बन्धनं स्यान्महोदधेः ॥ १९ ॥

अपरं च ।

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।
काकसंगाद्धतो हंसस्तिष्ठन्गच्छंश्च वर्तकः' ॥ २० ॥

राजोवाच—'कथमेतत् ।' शुकः कथयति—

कथा ४ ।

अस्त्युज्जयिनीवर्त्मकान्तारे प्लक्षतरुः । तत्र हंसकाकौ निवसतः । कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुः-काण्डं संनिधाय सुप्तः । तत्र क्षणान्तरे तन्मुखाद्वृक्षच्छायापगता । ततः सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता । ततो निर्भरनिद्रासुखिना तेन मुखव्यादानं

कृतम् । अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावदसौ पान्थ उत्थायोर्ध्वं निरीक्षते तावत्तेनावलोकितो हंसः काण्डेन हतो व्यापादितः ॥

वर्तककथामपि कथयामि—

कथा ५ ।

एकदा भगवतो गरुडस्य यात्राप्रसंगेन सर्वे पक्षिणः समुद्रतीरं गताः । ततः काकेन सह वर्तकश्चलितः । अथ गोपालस्य गच्छतो दधिभाण्डाद् वारंवारं तेन काकेन दधि खाद्यते । ततो यावदसौ दधिभाण्डं भूमौ निधायोर्ध्वमवलोकते तावत्तेन काकवर्तकौ दृष्टौ । ततस्तेन खेदितः काकः पलायितः । वर्तकः स्वभावनिरपराधो मन्दगतिस्तेन प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि—'न स्थातव्यं न गन्तव्यम्' इत्यादि ॥ ततो मयोक्तम्—भ्रातः शुक, किमेवं ब्रवीषि । मां प्रति यथा श्रीमद्देवस्तथा भवानपि ।' शुकेनोक्तम्—'अस्त्वेवम् । किंतु ।

दुर्जनैरुच्यमानानि संमतानि प्रियाण्यपि ।
अकालकुसुमानीव भयं संजनयन्ति हि ॥ २१ ॥

दुर्जनत्वंच भवतो वाक्यादेव ज्ञातं यदनयोर्भूपालयोर्विग्रहे भवद्वचनमेव निदानम् ।

ततोऽहं तेन राज्ञा यथाव्यवहारं संपूज्य प्रस्थापितः । शुकोऽपि मम पश्चादागच्छन्नास्ते । एतत्सर्वं परिज्ञाय यथाकर्तव्यमनुसंधीयताम् ।'

चक्रवाको विहस्याह—'देव, बकेन तावद्देशान्तरमपि गत्वा यथाशक्ति राजकार्यमनुष्ठितम् । किंतु देव स्वभाव एष मूर्खाणाम् । यतः ।

शतं दद्यान्न विवदेदिति विज्ञस्य संमतम् ।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम् ॥ २२ ॥

राजाह—'किमतीतोपालम्भनेन । प्रस्तुतमनुसंधीयताम् ।' चक्रवाको ब्रूते—'देव, विजने ब्रवीमि । यतः ।

वर्णाकारप्रतिध्वानैर्नेत्रवक्त्रविकारतः ।
अभ्यूहन्ति मनो धीरास्तस्माद्रहसि मन्त्रयेत्' ॥ २३ ॥

राजा मन्त्री च तत्र स्थितौ । अन्येऽन्यत्र गताः चक्रवाको ब्रूते—'देव, अहमेवं जानामि । कस्याप्यस्मन्नियोगिनः प्रेरणया बकेनेदमनुष्ठितम् । यतः ।

वैद्यानामातुरः श्रेयान्व्यसनी यो नियोगिनाम् ।
विदुषां जीवनं मूर्खः सद्वर्णो जीवनं सताम् ॥ २४ ॥

राजाऽब्रवीत्—'भवतु । कारणमत्र पश्चान्निरूपणीयम् । संप्रति यत्कर्तव्यं तन्निरूप्यताम् ।' चक्रवाको ब्रूते—'देव, प्रणिधिस्तावत्प्रहीयताम् । ततस्तदनुष्ठानं बलाबलं च जानीमः तथा हि ।

भवेत्स्वपरराष्ट्राणां कार्याकार्यावलोकने ।
चारश्चक्षुर्महीभर्तुर्यस्य नास्त्यन्ध एव सः ॥ २५ ॥

स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु तेनासौ स्वयं तत्रावस्थाय द्वितीयं तत्रत्यमन्त्रकार्यं सुनिभृतं निश्चित्य निगद्य प्रस्थापयति । गूढचारश्च यो जले स्थले चरति । ततोऽसावेव बको नियुज्यताम् एतादृश एव कश्चिद्बको द्वितीयत्वेन प्रयातु । तद्गृहलोकाश्च राजद्वारे तिष्ठन्तु। किंतु देव, एतदपि सुगुप्तमनुष्ठातव्यम् । यतः ।

षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्तया ।
इत्यात्मना द्वितीयेन मन्त्रः कार्यो महीभृता ॥ २६ ॥

राजा विमृश्योवाच—'प्राप्तस्तावन्मयोत्तमः प्रणिधिः ।' मन्त्री ब्रूते—तदा सङ्ग्रामविजयोऽपि प्राप्तः । अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच—'देव, जम्बुद्वीपादागतो द्वारि शुकस्तिष्ठति ।' राजा चक्रवाकमालोकते । चक्रवाकेणोक्तम्—'तावद्गत्वावासे तिष्ठतु पश्चादानीय द्रष्टव्यः ।' प्रतीहारस्तमावासस्थानं नीत्वागतः । राजाह—विग्रहस्तावत्समुपस्थितः ।' चक्रो ब्रूते—'देव, प्रागेव विग्रहो न विधिः । यतः ।

स किंभृत्यः स किंमन्त्री य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम ॥ २७ ॥

किंतु विग्रहमुपस्थितं विलोक्य व्यवह्रियताम् । यतः ।

यथा कालकृतोद्योगात्कृषिः फलवती भवेत्
तद्वन्नीतिरियं देव चिरात्फलति रक्षणात् ॥ २८ ॥

अपरं च ।

महतो दूरभीरुत्वमासन्ने शूरता गुणः ।
विपत्तौ च महांल्लोके धीरतामनुगच्छति ॥ २९ ॥

विशेषतश्च महाबलोऽसौ चित्रवर्णो राजा ।

अतस्तद्दूतोऽप्याश्वास्य तावद्ध्रियतां यावद्दुर्गः सज्जीक्रियते । यतः ।

एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं शतसहस्राणि तस्माद्दुर्गं विशिष्यते ॥ ३० ॥

राजाह—'दुर्गानुसंधाने को नियुज्यताम् ।' चक्रो ब्रूते—

यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत् ।
कर्मस्वदृष्टकर्मा यः शास्त्रज्ञोऽपि विमुह्यति ॥ ३१ ॥

समाहूयतां सारसः ।' तथानुष्ठिते सत्यागतं सारसमालोक्य राजोवाच—'भोः सारस, त्वं सत्वरं दुर्गमनुसंधेहि ।' सारसः प्रणम्योवाच—'देव, दुर्गं तावदिदमेव चिरात्सुनिरूपितमास्ते महत्सरः । किंत्वत्र मध्यवर्तिद्वीपे द्रव्यसंग्रहः क्रियताम् । यतः ।

धान्यानां संग्रहो राजन्नुत्तमः सर्वसंग्रहात् ।
निक्षिप्तं हि मुखे रत्नं न कुर्यात्प्राणधारणम् ॥ ३२ ॥

राजाह—'सत्वरं गत्वा सर्वमनुतिष्ठ ।' पुनः प्रविश्य प्रतीहारो ब्रूते—'देव, सिंहलद्वीपादागतो मेघवर्णो नाम वायसः सपरिवारो द्वारि तिष्ठति । देवपादं द्रष्टुमिच्छति ।' राजाह—'काकः पुनः सर्वज्ञो बहुद्रष्टा च । तद्भवति संग्राह्य इत्यनुवर्तते ।' चक्रो ब्रूते–'देव, अस्त्येवम् । किंतु काकः स्थलचरः । तेनास्मद्विपक्षे नियुक्तः कथं संग्राह्यः । तथा चोक्तम्—

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ।
स परैर्हन्यते मूढो नीलवर्णशृगालवत्' ॥ ३३ ॥

राजोवाच—'कथमेतत् ।' मन्त्री कथयति–

कथा ६ ।

अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे पतितः । पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः । अथ नीलीभाण्डस्वामिना मृत इति ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वापसारितस्तस्मात्पलायितः ततोऽसौ वनं गत्वा स्वकीयमात्मानं नीलवर्णमवलोक्याचिन्तयत्—'अहमिदानीमुत्तमवर्णः । तदाहं स्वकीयोत्कर्षं किं न साधयामि ।' इत्यालोच्य शृगालानाहूय तेनोक्तम्—अहं भगवत्या वनदेवतया

महस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः । तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः ।' शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टांगपातं प्रणम्योचुः—'यथाज्ञापयति देवः ।' इत्यनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव । ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान्प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञया स्वज्ञातयः सर्वे दूरीकृताः । ततो विषण्णाञ्छृगालानवलोक्य केनचिद्वृद्धशृगालेनैतत्प्रतिज्ञातम्—'मा विषीदत । यदनेनानभिज्ञेन नीतिविदो मर्मज्ञा वयं स्वसमीपात्परिभूतास्तद्यथायं नश्यति तथा विधेयम् । यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते । तद्यथायं परिचितो भवति तथा कुरुत । तत्र चैवमनुष्ठेयम् । यतः सर्वे संध्यासमये संनिधाने महारावमेकदैव करिष्यथ । ततस्तं शब्दमाकर्ण्य जातिस्वभावात्तेनापि शब्दः कर्तव्यः ।' ततस्तथानुष्ठिते सति तद्वृत्तम् । यतः ।

य: स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः ।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ॥ २४ ॥

ततः शब्दादभिज्ञाय स व्याघ्रेण हतः ।

अतोऽहं ब्रवीमि—'आत्मपक्षं परित्यज्य' इत्यादि ॥ राजाह—'यद्येवं तथापि दृश्यतां तावदयं दूरादागतः । तत्संग्रहे विचारः कार्यः ।' चक्रो ब्रूते—'देव, प्रणिधिः प्रहितो दुर्गश्च सज्जीकृतः । अतः शुकोऽप्यानीय प्रस्थाप्यताम् ।

ततः सभां कृत्वाहूतः शुकः काकश्च शुकः किंचिदुन्नतशिरा दत्तासन उपविश्य ब्रूते 'भो हिरण्यगर्भ महाराजाधिराज श्रीमच्चित्रवर्णस्त्वां समाज्ञापयति । यदि जीवितेन श्रिया वा प्रयोजनमस्ति तदा सत्वरमागत्यास्मच्चरणौ प्रणम । न

चेद्वयमथातुं स्थानान्तरं चिन्तय । राजा सकोपमाह- 'आः, कोऽप्यस्माकं पुरतो नास्ति य एनं गलहस्तयति ।' उत्थाय मेघवर्णो ब्रूते--'देव, आज्ञापय । हन्मि दुष्टं शुकम् ।' सर्वज्ञो राजानं काकं च सान्त्वयन्ब्रूते-शृणु तावत् ।

न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति
सत्यं न तद्यच्छलमभ्युपैति ॥ ३५ ॥

यतो धर्मश्चैषः ।

दूतो म्लेच्छोऽप्यवध्यः स्याद्राजा दूतमुखो यतः ।
उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ॥ ३६ ॥

किं च ।

स्वापकर्षं परोत्कर्षं दूतोक्तैर्मन्यते तु कः ।
सदैवावध्यभावेन दूतः सर्वं हि जल्पति' ॥ ३७ ॥

ततो राजा काकश्च स्वां प्रकृतिमापन्नौ । शुकोऽप्युत्थाय चलितः ।

पश्चाच्चक्रवाकेणानीय प्रबोध्य कनकालंकारादिकं दत्वा संप्रेषितो ययौ शुकोऽपि विन्ध्याचलराजं प्रणतवान् । राजोवाच—शुक का वार्ता । कीदृशोऽसौ देशः । 'शुको ब्रूते—देव संक्षेपादियं वार्ता । संप्रति युद्धोद्योगः क्रियताम् । देशश्चासौ कर्पूरद्वीपः स्वर्गैकदेशो राजा च द्वितीयस्वर्गपतिः । कस्तं वर्णयितुं शक्यते ।' ततः सर्वाञ्शिष्टानाहूय राजा मन्त्रयितुमुपविष्टः । आह च—संप्रति कर्तव्यविग्रहे यथाकर्तव्यमुपदेशं ब्रूत । विग्रहः पुनरवश्यं कर्तव्यः ।

दूरदर्शी नाम गृध्रो ब्रूते—'देव, व्यसनितया विग्रहो न विधिः । यतः

मित्रामात्यसुहृद्वर्गा यदा स्युर्दृढभक्तयः ।
शत्रूणां विपरीताश्च कर्तव्यो विग्रहस्तदा ॥ ३८ ॥

अन्यच्च ।

भूमिर्मित्रं हिरण्यं च विग्रहस्य फलं त्रयम् ।
यदैतन्निश्चितं भावि कर्तव्यो विग्रहस्तदा' ॥ ३९ ॥

राजाह—'मद्बलं तावदवलोकयतु मन्त्री । तदैतेषामुपयोगो ज्ञायताम् एवमाहूयतां मौहूर्तिकः । निर्णीय शुभलग्नं ददातु । मन्त्री ब्रूते—' तथापि सहसा यात्राकरणमनुचितम् ।

राजाह—'मन्त्रिन्, ममोत्साहभङ्गः सर्वथा मा कृथाः । विजिगीषुर्यथा परभूमिमाक्रामति तथा कथय ।' गृध्रो ब्रूते—' तत्कथयामि । किंतु तदनुष्ठितमेव फलप्रदम् ।

राजादेशश्चानतिक्रमणीयः । यथाश्रुतं तन्निवेदय । शृणु ।

नद्यद्रिवनदुर्गेषु यत्र यत्र भयं नृप ।
तत्र तत्र च सेनानीर्यायाद्व्यूहीकृतैर्बलैः ॥ ४० ॥

बलाध्यक्षः पुरो यायात्प्रवीरपुरुषान्वितः ।
मध्ये कलत्रं स्वामी च कोशः फल्गु च यद्बलम् ॥ ४१ ॥

पार्श्वयोरुभयोरश्वा अश्वानां पार्श्वतो रथाः ।
रथानां पार्श्वयोर्नागा नागानां च पदातयः ॥ ४२ ॥

पश्चात्सेनापतिर्यायात्खिन्नानाश्वासयञ्छनैः ।

मन्त्रिभिः सुभटैर्युक्तः प्रतिगृह्य बलं नृपः ॥ ४३ ॥

राजाह—'आः' किं बहुनोदितेन ।

आत्मोदयः परग्लानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते' ॥ ४४ ॥

मन्त्रिणा विहस्योच्यते—'सर्वमेतद्विशेषतश्चोच्यते । किंतु ।

अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः, ॥ ४५ ॥

तत उत्थाय राजा मौहूर्तिकावेदितलग्ने प्रस्थितः ।

अथ प्रहितप्रणिधिर्हिरण्यगर्भमागत्योवाच—'देव, समागतप्रायो राजा चित्रवर्णः । संप्रति मलयपर्वताधित्यकायां समावासितकटकोऽनुवर्तते । दुर्गशोधनं प्रतिक्षणमनुसंधातव्यं यतोऽसौ गृध्रो महामन्त्री । किंच केनचित्सह तस्य विश्वासकथाप्रसङ्गेनैव तदिङ्गितमवगतं मया यदनेन कोऽप्यस्मद्दुर्गे प्रागेव नियुक्तः ।, ब्रूते—'देव काक एवासौ संभवति ।, राजाह—'न कदाचिदेतत् । यद्येवं तदा कथं शुकस्याभिभवोद्योगः कृतः । अपरं च । शुकस्यागमनात्तस्य विग्रहोत्साहः । स चिरादत्रास्ते ।' मन्त्री ब्रूते तथाप्यागन्तुः शङ्कनीयः ।, राजाह—'आगन्तुका हि कदाचिदुपकारका दृश्यन्ते । शृणु ।

आसीद्वीरवरो नाम शूद्रकस्य महीभृतः ।
सेवकः स्वल्पकालेन स ददौ सुतमात्मनः' ॥ ४६ ॥

चक्रः पृच्छति—'कथमेतत् ।, राजा कथयति—

कथा ७ ।

अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवानभवम् । तत्र वीरवरो नाम महाराजपुत्रः कुतश्चिद्देशादागत्य राजद्वारमुपगम्य प्रतिहारमुवाच—'अहं तावद्वर्तनार्थी राजपुत्रः । राजदर्शनं कारय ।' ततस्तेनासौ राजदर्शनं कारितो ब्रूते—'देव, यदि मया सेवकेन प्रयोजनमस्ति तदास्मद्वर्तनं क्रियताम् ।' शूद्रक उवाच—'किं ते वर्तनम् ।' वीरवरो ब्रूते—प्रत्यहं सुवर्णं पञ्च शतानि देहि । राजाह—का ते सामग्री । वीरवरो ब्रूते—'द्वौ बाहू तृतीयश्च खड्गः । राजाह—'नैतच्छक्यम् । तच्छ्रुत्वा वीरवरश्चलितः । अथ मन्त्रिभिरुक्तम्—'देव, दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोऽयमेतावद्वर्तनं गृह्णात्यनुपयुक्तो वेति ।' ततो मन्त्रिवचनादाहूय वीरवराय ताम्बूलं दत्त्वा पञ्चशतानि सुवर्णानि दत्तानि । तद्विनियोगश्च राज्ञा सुनिभृतंनिरूपितः तदर्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यो दत्तम् । स्थितस्यार्धं दुःखितेभ्यः । तदवशिष्टं भोज्यव्ययविलासव्ययेन । एतत्सर्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं खड्गपाणिः सेवते । यदा च राजा स्वयं समादिशति तदा स्वगृहमपि याति ।

अथैकदा कृष्णचतुर्दश्यां रात्रौ राजा सकरुणं क्रन्दनध्वनिं शुश्राव । शूद्रक उवाच—'कः कोऽत्र द्वारि ।' तेनोक्तम्—'देव, अहं वीरवरः' राजोवाच—क्रन्दनानुसरणं क्रियताम् ।' वीरवरः यथाज्ञापयति देवः, इत्युक्त्वा चलितः । राज्ञा च चिन्तितम्—'नैतदुचितम् । अयमेकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रेरितः । तदनुगत्वा किमेतदिति निरूपयामि ।' ततोराजापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्जगाम । गत्वा च वीरवरेण सा रुदती रूपयौवनसंपन्ना सर्वालंकारभूषिता काचित्स्त्री दृष्टा पृष्टा च—'का त्वम् । किमर्थं रोदिषि ।' स्त्रियोक्तम्—'अहमेतस्य शूद्रकस्य राजलक्ष्मीः । चिरादेतस्य भुजच्छायायां महता सुखेन

विश्रान्ता । इदानीमन्यत्र गमिष्यामि । वीरवरो ब्रूते—'यत्रोपायः संभवति, तत्रोपायोऽप्यस्ति । तत्कथं स्यात्पुनरिहावलम्बनं भवत्याः ।' लक्ष्मीरुवाच—'यदि त्वमात्मनः पुत्रं शक्तिधरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमंगलाया उपहारीकरोषि तदहं पुनरत्र सुचिरं निवसामि' इत्युक्त्वाऽदृश्याभवत् ।

ततो वीरवरेण स्वगृहं गत्वा निद्रायमाणा स्ववधूः प्रबोधिता पुत्रश्च । तौ निद्रां परित्यज्योत्थायोपविष्टौ । वीरवरस्तत्सर्वं लक्ष्मीवचनमुक्तवान् तच्छ्रुत्वा सानन्दं शक्तिधरो ब्रूते—'धन्योऽहमेवंभूतः स्वामिराज्यरक्षार्थं यस्मनोपयोगः श्लाघ्यः । तत्कोऽधुना विलम्बस्य हेतुः । एवंविधे कर्मणि देहस्य विनियोगः श्लाघ्यः ।

शक्तिधरमातोवाच—'यद्येतन्न कर्तव्यं तत्केनाप्यन्येन कर्मणामुष्यस्य महावर्तनस्य निष्क्रयो भविष्यति ।' इत्यालोच्य सर्वे सर्वमंगलायाः स्थानं गताः तत्र सर्वमंगलां संपूज्य वीरवरो ब्रूते—'देवि, प्रसीद । विजयतां शूद्रको महाराजः । गृह्यतामुपहारः ।' इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । ततो वीरवरश्चिन्तयामास—'गृहीतराजवर्तनस्य निस्तारः कृतः । अधुना निष्पुत्रस्य जीवनेनालम् ।' इत्यालोच्यात्मनः शिरश्छेदः ततः स्त्रियापि स्वामिपुत्रशोकार्तया तदनुष्ठितम् । तत्सर्वं दृष्ट्वा राजा साश्चर्यं चिन्तयामास—

'जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ ४७ ॥

तदेतेन परित्यक्तेन मम राज्येनाप्यप्रयोजनम् ।' ततः शूद्रकेणापि स्वशिरश्छेत्तुं खड्गः समुत्थापितः । अथ भगवत्या सर्वमंगलया राजा हस्ते धृत उक्तश्च—'पुत्र, प्रसन्नास्मि ते । एतावता साहसेनालम् । जीवनान्तेऽपि तव राज्यभंगो नास्ति ।' राजा च साष्टाङ्गं प्रणम्योवाच—'देवि, किं मे राज्येन । जीवितेन वा किं प्रयोजनम् । यद्यहमनुकम्पनीयस्तदा ममायुःशेषेणायं सदारपुत्रो वीरवरो जीवतु । अन्यथाहं यथा-

प्राप्तां गतिं गच्छामि ।' भगवत्युवाच—'पुत्र, अनेन ते सत्त्वोत्कर्षेण भक्तवात्सल्येन च तुष्टास्मि । गच्छ । विजयी भव । अयमपि सपरिवारो राजपुत्रो जीवतु ।' इत्युक्त्वा देव्यदृश्याभवत् । ततो वीरवरः सपुत्रदारो गृहं गतः । राजापि तैरलक्षितः सत्वरमन्तःपुरं प्रविष्टः ।

अथ प्रभाते वीरवरो द्वारस्थः पुनः भूपालेन पृष्टः सन्नाह—'देव, सा रुदती मामवलोक्यादृश्याभवत् । न काप्यन्या वार्ता विद्यते ।' तद्वचनमाकर्ण्य राजाचिन्तयत्—'कथमयं श्लाघ्यो महासत्त्वः । यतः ।

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः ॥ ४८ ॥

एतन्महापुरुषलक्षणमेतस्मिन्सर्वमस्ति ।' ततः स राजा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादात्तस्मै कर्नाटराज्यं ददौ । तत्किमागन्तुको जातिमात्राद्दुष्टः तत्राप्युत्तमाधममध्यमाः सन्ति ।' चक्रवाको ब्रूते—

'योऽकार्यं कार्यवच्छास्ति स किंमन्त्री नृपेच्छया ।
वरं स्वामिमनोदुःखं तन्नाशो न त्वकार्यतः ॥ ४९ ॥
वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियः सदा ।
शरीरधर्मकोशेभ्यः क्षिप्रं स परिहीयते ॥ ५० ॥

शृणु देव ।

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।
हत्वा भिक्षुं महालोभान्निध्यर्थी नापितो हतः' ॥ ५१ ॥

राजा पृच्छति—'कथमेतत् । मन्त्री कथयति—

कथा ९ ।

अस्त्ययोध्यायां चूडामणिर्नाम क्षत्रियः । तेन धनार्थिना महता क्लेशेन भगवांश्चन्द्रार्धचूडामणिश्चिरमाराधितः । ततः क्षीणपापोऽसौ स्वप्ने दर्शनं दत्त्वा भगवदादेशाद्यक्षेश्वरेणादिष्टः—'यत्त्वमद्य प्रातः क्षौरं कृत्वा लगुडं हस्ते धृत्वा गृहे निभृतं स्थास्यसि । ततोऽस्मिन्नेवाङ्गणे समागतं भिक्षुं पश्यसि तं निर्दयं लगुडप्रहारेण हनिष्यसि । ततः सुवर्णकलशो

भविष्यति । तेन त्वया यावज्जीवं सुखिना भवितव्यम् ।' ततस्तथानुष्ठिते तद्वृत्तम् । तत्र क्षौरकरणायानीतेन नापितेनालोक्य चिन्तितम्—'अये, निधिप्राप्तेरयमुपायः । अहमप्येवं किं न करोमि ।' ततः प्रभृति नापितः प्रत्यहं तथाविधो लगुडहस्तः सुनिभृतं भिक्षोरागमनं प्रतीक्षते एकदा तेन प्राप्तो भिक्षुःलगुडेन व्यापादितः । तस्मादपराधात्सोऽपि नापितो राजपुरुषैर्व्यापादितः । अतोऽहं ब्रवीमि—'पुण्याल्लब्धं यदेकेन' इत्यादि ॥

राजाह—

'पुरावृत्तकथोद्गारैः कथं निर्णीयते परः ।
स्यान्निष्कारणबन्धुर्वा किं वा विश्वासघातकः ॥ ५२ ॥

यातु । प्रस्तुतमनुसंधीयताम् । मलयाधित्यकायां चेच्चित्रवर्णस्तदधुना किं विधेयम् ।' मन्त्री वदति—'देव, आगतप्रणिधिमुखान्मया श्रुतं तन्महामन्त्रिणो गृध्रस्योपदेशे यच्चित्रवर्णेनानादरः कृतः ततोऽसौ मूढो जेतुं शक्यः । तथा चोक्तम्—

लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखछेद्यो रिपुः स्मृतः ॥ ५३ ॥

ततोऽसौ यावदस्मद्दुर्गद्वाररोधं न करोति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि हन्तुं सारसादयः सेनापतयो नियुज्यन्ताम् । तथा चोक्तम्—

अवस्कन्दभयाद्राजा प्रजागरकृतश्रमम् ।
दिवासुप्तं समाहन्यान्निद्राव्याकुलसैनिकम् ॥ ५४ ॥

अतस्तस्य प्रमादिनो बलं गत्वा यथावकाशं दिवानिशं घ्नन्त्वस्मत्सेनापतयः ।' तथानुष्ठिते चित्रवर्णस्य सैनिकाः सेनापतयश्च बहवो निहताः । ततश्चित्रवर्णो विषण्णः स्वमन्त्रिणं दूरदर्शिनमाह—'तात, किमित्यस्मदुपेक्षा क्रियते किं काप्यविनयो ममास्ति ।

गृध्रोऽवदत्—'देव, शृणु ।

अविद्वानपि भूपालो विद्यावृद्धोपसेवया ।
परां श्रियमवाप्नोति जलासन्नतरुर्यथा ॥ ५५ ॥

अन्यच्च ।

पानं स्त्री मृगया द्यूतमर्थदूषणमेव च ।
वाग्दण्डयोश्च पारुष्यं व्यसनानि महीभुजाम् ॥ ५६ ॥

त्वया स्वबलोत्साहमवलोक्य साहसैकवासिना मयोपन्यस्तेष्वपि मन्त्रेष्वनवधानं वाक्पारुष्यं च कृतम् । अतो दुर्नीतेः फलमिदमनुभूयते । तथा चोक्तम्—

दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
संतापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्त्रीकृता न विषयाः परितापयन्ति ॥ ५७ ॥

ततो मयाप्यालोचितम्—'प्रज्ञाहीनोऽयं राजा । नो चेत्कथं नीतीशास्त्रकथाकौमुदीं वागुल्काभिस्तिमिरयति । यतः—

यस्य नास्ति स्वयं प्राज्ञा शास्त्रं तस्य करोतु किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति' ॥ ५८ ॥

इत्यालोच्य तूष्णीं स्थितः । अथ राजा बद्धाञ्जलिराह—'तात, अस्त्ययं ममापराधः । इदानीं यथावशिष्टबलसहितः प्रत्यावृत्य विन्ध्याचलं गच्छामि तथोपदिश ।' गृध्रः स्वगतं चिन्तयति—'क्रियतामत्र प्रतीकारः यतः ।

देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च' ॥ ५९ ॥

मन्त्री प्रहस्य ब्रूते—देव, मा भैषीः । समाश्वसिहि । शृणु देव,

मन्त्रिणां भिन्नसंधाने भिषजां सांनिपातिके ।
कर्मणि व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः ॥ ६० ॥

तदत्र भवत्प्रतापादेव दुर्गं भङ्क्त्वा कीर्तिप्रतापसहितं त्वामचिरेण कालेन विन्ध्याचलं नेष्यामि ।' राजाह—'कथमधुना स्वल्पबलेन तत्संपद्यते ।' गृध्रो वदति—'देव सर्वं भविष्यति । यतो विजिगीषोरदीर्घसूत्रता विजयसिद्धेरवश्यंभावि लक्षणम् । तत्सहसैव दुर्गावरोधः क्रियताम् ।'

प्रहितप्रणिधिना बकेनागत्य हिरण्यगर्भस्य तत्कथितम्—'देव, स्वल्पबल एवायं राजा चित्रवर्णो गृध्रस्य मन्त्रोपस्तम्भेन दुर्गावरोधं करिष्यति ।' राजाह—'सर्वज्ञ, किमधुना विधेयम् । चक्रो ब्रूते—'स्वबले सारासारविचारः क्रियताम् ।' तज्ज्ञात्वा सुवर्णवस्त्रादिकं यथार्हं प्रसादप्रदानं क्रियताम् ।

राजाह—'कथमिह समये ऽतिव्ययो युज्यते ।' उक्तं च—'आपदर्थे धनं रक्षेत्' इति । मन्त्री ब्रूते—'श्रीमतः कथमापदः । राजाह—'कदाचिच्चलते लक्ष्मीः ।' मन्त्री ब्रूते—'संचितापि विनश्यति । तद्देव, कार्पण्यं विमुच्य दानमानाभ्यां स्वभटाः पुरस्क्रियन्ताम् । तथा चोक्तम्—'

परस्परज्ञाः संहृष्टास्त्यक्तुं प्राणान्सुनिश्चिताः ।
कुलीनाः पूजिताः सम्यग्विजयन्ते द्विषद्बलम् ॥ ६१ ॥

অথাগত্য প্রণম্য মেঘবর্ণো ব্রূতে—'দেব, দৃষ্টিপ্রসাদং কুরু । ইদানীং বিপক্ষো দুর্গদ্বারি বর্ততে । তদ্দেবপাদাদেশাদ্বহির্নিঃসৃত্য স্ববিক্রমং দর্শয়ামি । তেন দেবপাদানামানৃণ্যমুপগচ্ছামি ।' চক্রো ব্রূতে—'মৈবম্ । যদি বহির্নিঃসৃত্য যোদ্ধব্যং তদা দুর্গাশ্রয়ণমেব নিষ্প্রয়োজনম্ ।
অপরং চ ।

বিষমো হি যথা নক্রঃ সলিলান্নির্গতো বশঃ ।
বনাদ্বিনির্গতঃ শূরঃ সিংহোঽপি স্যাচ্ছৃগালবত্ ।। ৬২ ।।

দেব, স্বয়ং গত্বা দৃশ্যতাং যুদ্ধম ।

অথ তে সর্বে দুর্গদ্বারং গত্বা মহাহবং কৃতবন্তঃ । অপরেদ্যুশ্চিত্রবর্ণো রাজা গৃধ্রমুবাচ—'তাত' স্বপ্রতিজ্ঞাতমমুনা নির্বাহয় ।' গৃধ্রো ব্রূতে—'দেব, শৃণু তাবত্ ।

অকালসহমত্যল্পং মূর্খব্যসনিনায়কম্ ।
অগুপ্তং ভীরুযোধং চ দুর্গব্যসনমুচ্যতে ।। ৬৩ ।।

তত্তাবদত্র নাস্তি ।

উপজাপশ্চিরং রোধোঽবস্কন্দস্তীব্রপৌরুষম্ ।
দুর্গস্য লংঘনোপায়াশ্চত্বারঃ কথিতা ইমে ।। ৬৪ ।।

অত্র যথাশক্তি ক্রিয়তে যত্নঃ । (কর্ণে কথয়তি ।) এবমেব ।'
ততোঽনুদিত এব ভাস্করে চতুর্ষ্বপি দুর্গদ্বারেষু বৃত্তে যুদ্ধে দুর্গাভ্যন্তরগৃহেষ্বেকদা কাকৈরগ্নির্নিক্ষিপ্তঃ । ততঃ 'গৃহীতং গৃহীতং দুর্গম্' ইতি কোলাহলং শ্রুত্বা সর্বতঃ প্রদীপ্তাগ্নিমবলোক্য রাজহংসসৈনিকা দুর্গবাসিনশ্চ সত্বরং হ্রদং প্রবিষ্টাঃ ।

राजहंसः स्वभावान्मन्दगतिः सारसद्वितीयश्चेति चित्रवर्णस्य सेनापतिना कुक्कुटेनागत्य वेष्टितः । हिरण्यगर्भः सारसमाह—'सारससेनापते, ममानुरोधादात्मानं कथं व्यापादयिष्यसि । त्वमधुना गन्तुं शक्तः । तत्कृत्वा जलं प्रविश्यात्मानं परिरक्ष । अस्मत्पुत्रं चूडामणिनामानं सर्वज्ञसंमत्या राजानं करिष्यसि ।' सारसो ब्रूते—देव, न वक्तव्यमेव दुःसहं वचः । यावच्चन्द्रार्कौ दिवि तिष्ठतस्तावद्विजयतां देवः । अहंदेव, दुर्गाधिकारी । मन्मांसासृग्विलिप्तेन द्वारवर्त्मना प्रविशतु शत्रुः । अपरं च ।

दाता क्षमी गुणग्राही स्वामी दुःखेन लभ्यते ।'

राजाह—'सत्यमेवैतत् । किंतु ।

शुचिर्दक्षोऽनुरक्तश्च जाने भृत्योऽपि दुर्लभः' ॥ ६५ ॥

सारसो ब्रूते—'शृणु देव,

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः क्रियते ॥ ६६ ॥

देव, त्वं च स्वामी सर्वथा रक्षणीयः । यतः ।

प्रकृतिः स्वामिनं त्यक्त्वा समृद्धापि न जीवति ।
अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि ॥ ६७ ॥

अपरं च ।

नरेशे जीवलोकोऽयं निमीलति निमीलति ।
उदेत्युदीयमाने च रवाविव सरोरुहम् ॥ ६८ ॥

अथ कुक्कुटेनागत्य राजहंसस्य शरीरे खरतरनखाघातः कृतः । तदा सत्वरमुपसृत्य सारसेन स्वदेहान्तरितो राजा जले क्षिप्तः । अथ कुक्कुटैर्नख प्रहारजर्जरीकृतेन सारसेन कुक्कुटसेना बहुशो हता । पश्चात्सारसो ऽपि चञ्चुप्रहारेण विभिद्य व्यापादितः । । अथ चित्रवर्णो दुर्गं प्रविश्य दुर्गावस्थितं द्रव्यं ग्राहयित्वा बन्दिभिर्जयशब्दैरानन्दितः स्वस्कन्धावारं जगाम ॥

अथ राजपुत्रैरुक्तम्—'तस्मिन्नृपबले स पुण्यवान्सारस एव येन स्वदेहत्यागेन स्वामी रक्षितः । उक्तं चैतत्—

जनयन्ति सुतान्गावः सर्वा एव गवाकृतीन् ।
विषाणोल्लिखितस्कन्धं काचिदेव गवां पतिम् ॥ ६९ ॥

विष्णुशर्मोवाच—'स तावद्विद्याधरीपरिजनः स्वर्गसुखमनुभवतु महासत्त्वः तथा चोक्तम्—

आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ।
भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥ ७० ॥
यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयाँल्लभते लोकान्यदि क्लैब्यं न गच्छति ॥ ७१ ॥

अपरमप्येवमस्तु ।

विग्रहः करितुरङ्गपत्तिभि-
र्नो कदापि भवतां महीभुजाम् ।
नीतिमन्त्रपवनैः समाहताः
संश्रयन्तु गिरिगह्वरं द्विषः' ॥ ७२ ॥

इति हितोपदेशे विग्रहो नाम तृतीयः
कथासंग्रहः समाप्तः ।

संधिः ।

पुनः कथारम्भकाले राजपुत्रैरुक्तम्—'आर्य, विग्रहः श्रुतोऽस्माभिः। संधिरधुनाभिधीयताम् ।' विष्णुशर्मणोक्तम्—'श्रूयताम् । संधिमपि कथयामि यस्यायमाद्यः श्लोकः—

वृत्ते महति सङ्ग्रामे राज्ञोर्निहतसेनयोः ।
स्थेयाभ्यां गृध्रचक्राभ्यां वाचा संधिः कृतः क्षणात्' ॥ १ ॥

राजपुत्रा ऊचुः—'कथमेतत् ।' विष्णुशर्मा कथयति—

ततस्तेन राजहंसेनोक्तम्-'केनास्मद्दुर्गे निक्षिप्तोऽग्निः । किं परकीयेण किंवास्मद्दुर्गवासिना केनापि विपक्षप्रयुक्तेन ।' चक्रो ब्रूते—'देव, भवतो निष्कारणबन्धुरसौ मेघवर्णः सपरिवारो न दृश्यते । तन्मन्ये तस्यैव विचेष्टितमिदम् । राजा क्षणं विचिन्त्याह—'अस्ति तावदेवं मम दुर्दैवमेतत् । तथा चोक्तम्—

अपराधः स दैवस्य न पुनर्मन्त्रिणामयम् ।
कार्यं सुचरितं क्वापि दैवयोगाद्विनश्यति' ॥ २ ॥

मन्त्री ब्रूते—'उक्तमेवैतत् ।

विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्मदोषांश्च नैव जानात्यपण्डितः ॥ ३ ॥

अपरं च ।

सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ४ ॥

राजाह—'कथमेतत् । मन्त्री कथयति—

कथा १।

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः तत्र चिरं संकटविकटनामानौ हंसौ निवसतः। तयोर्मित्रं कम्बुग्रीवनामा कूर्मश्च प्रति वसति। अथैकदा धीवरैरागत्य तत्रोक्तम्—'यदत्रास्माभिरद्योषित्वा प्रातर्मत्स्यकूर्मादयो व्यापादयितव्याः।' तदाकर्ण्य कूर्मो हंसावाह—'सुहृदौ, श्रुतोऽयं धीवरालापः। अधुना किं मया कर्तव्यम्?' हंसावाहतुः—'ज्ञायताम्। पुनस्तावत्प्रातर्यदुचितं तत्कर्तव्यम्।' कूर्मो ब्रूते—'मैवम्। यतो दृष्टव्यतिकरोऽहमत्र। तथा चोक्तम्—

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति' ॥ ५ ॥

तावाहतुः—'कथमेतत्।' कूर्मः कथयति—

कथा २।

पुरास्मिन्नेव सरस्येवंविधेषु धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितम्। तत्रानागतविधाता नामैको मत्स्यः। तेनालोचितम्—'अहं तावज्जलाशयान्तरं गच्छामि' इत्युक्त्वा ह्रदान्तरं गतः। अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम्—'भविष्यदर्थे प्रमाणाभावात्कुत्र मयागन्तव्यम्। तदुत्पन्ने यथाकार्यं तदनुष्ठेयम्।

ततो यद्भविष्येणोक्तम्—

'यदभावि न तद्भावि भावि चेन्न तदन्यथा।
इति चिन्ता विषघ्नोऽयमगदः किं न पीयते' ॥ ६ ॥

तत्र प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर्मृतवदात्मानं संदर्श्य स्थितः । ततो जालादपसारितो यथाशक्त्युत्प्लुत्य गभीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि—'अनागतविधाता' इत्यादि ॥ तद्यथाहमन्यद्ध्रदं प्राप्नोमि तथा क्रियताम्', हंसावाहतुः— जलाशयान्तरे प्राप्ते तव कुशलम् । स्थले गच्छतस्ते को विधिः । कूर्म आह— 'यथाहं भवद्भ्यां सह आकाशवर्त्मना यामि तथा विधीयताम्', हंसौ ब्रूतः —कथमुपायः संभवति ।' कच्छपो वदति—'युवाभ्यां चञ्चुधृतकाष्ठखण्डमेकं मया मुखेनावलम्ब्य गन्तव्यम् । युवयोः पक्षबलेन मयापि सुखेन गन्तव्यम्', हंसौ ब्रूतः—'संभवत्येष उपायः किंतु ।

उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः प्रजाः', ॥ ७ ॥

कूर्मः पृच्छति 'कथमेतत्', तौ कथयतः –

कथा ३ ।

अस्त्युत्तरापथे गृध्रकूटनाम्नि पर्वते महान्पिप्पलवृक्षः । तत्रानेकबका निवसन्ति । तस्य वृक्षस्याधस्ताद् विवरे सर्पो बालापत्यानि खादति । अथ शोकार्तानां बकानां विलापं श्रुत्वा केनचिद्बकेनाभिहितम्—'एवं कुरुत । यूयं मत्स्यानुपादाय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेण विकिरत ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेषाद् व्यापादयितव्यश्च', तथानुष्ठिते तद्वृत्तम् ।' ततस्तत्र वृक्षे नकुलैर्बकशावकरवः श्रुतः । पश्चात्तैर्वृक्षमारुह्य बकशावकाः खादिताः । अत आवां ब्रूवः—'उपायं चिन्तयन्' इत्यादि । आवाभ्यां नीयमानं त्वामवलोक्य लोकैः

तत्र प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर्मृतवदात्मानं संदर्श्य स्थितः । ततो जालादपसारितो यथाशक्त्युत्प्लुत्य गभीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि—'अनागतविधाता' इत्यादि ॥ तद्यथाहमन्यद्ध्रदं प्राप्नोमि तथा क्रियताम् ।' हंसावाहतुः— 'जलाशयान्तरे प्राप्ते तव कुशलम् । स्थले गच्छतस्ते को विधिः ।' कूर्म आह—'यथाहं भवद्भ्यां सह काशवर्त्मना यामि तथा विधीयताम् ।' हंसौ ब्रूतः—'कथमुपायः संभवति ।' कच्छपो वदति—'युवाभ्यां चञ्चुधृतकाष्ठखण्डमेकं मया मुखेनावलम्ब्य गन्तव्यम् । युवयोः पक्षबलेन मयापि सुखेन गन्तव्यम् ।' हंसौ ब्रूतः—'संभवत्येष उपायः किंतु ।

उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥ ७ ॥'

कूर्मः पृच्छति 'कथमेतत्', तौ कथयतः—

कथा ३ ।

अस्त्युत्तरापथे गृध्रकूटनाम्नि पर्वते महान्पिप्पलवृक्षः । तत्रानेके बका निवसन्ति । तस्य वृक्षस्याधस्ताद्विवरे सर्पो बालापत्यानि खादति । अथ शोकार्तानां बकानां विलापं श्रुत्वा केनचिद्वृद्धबकेनाभिहितम्—'एवं कुरुत । यूयं मत्स्यानुपादाय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेण विकिरत । ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यश्च ।' तथानुष्ठिते तद्वृत्तम् । ततस्तत्र वृक्षे नकुलैर्बकशावकरवः श्रुतः । पश्चात्तैर्वृक्षमारुह्य बकशावकाः खादिताः । अत आवां ब्रूवः—'उपायं चिन्तयन्' इत्यादि । आवाभ्यां नीयमानं त्वामवलोक्य लोकैः

किञ्चिद्वक्तव्यमेव । तदाकर्ण्य यदि त्वमुत्तरं दास्यसि तदा त्वन्मरणम् । तत्सर्वथात्रैव स्थीयताम् ।' कूर्मो वदति—'किमहमप्राज्ञः । नाहमुत्तरं दास्यामि । किमपि न वक्तव्यम् ।' तथानुष्ठिते तथाविधं कूर्ममालोक्य सर्वे गोरक्षकाः पश्चाद्धावन्ति वदन्ति च कश्चिद्वदति—'यद्ययं कूर्मः पतति तदात्रैव पक्त्वा खादितव्यः ।' कश्चिद्वदति—'अत्रैव दग्ध्वा खादितव्योऽयम् ।' कश्चिद्वदति—'गृहं नीत्वा भक्षणीयः ।' इति तद्वचनं श्रुत्वा स कूर्मः कोपाविष्टो विस्मृतपूर्वसंस्कारः प्राह—'युष्माभिर्भस्म भक्षितव्यम्' इति वदन्नेव पतितस्तैर्व्यापादितश्च। अतोऽहं ब्रवीमि 'सुहृदां हितकामानाम्, इत्यादि । अथ प्रणिधिर्बकस्तत्रागत्योवाच—'देव, प्रागेव मया निगदितम् । दुर्गशोधनं हि प्रतिक्षणं कर्तव्यमिति । तच्च युष्माभिर्न कृतं तदनवधानस्य फलमनुभूतम् । दुर्गदाहो मेघवर्णेन वायसेन गृध्रप्रयुक्तेन कृतः ।' राजा निःश्वस्याह—

'प्रणयादुपकाराद्वा यो विश्वसिति शत्रुषु ।
स सुप्त इव वृक्षाग्रात्पतितः प्रतिबुध्यते ॥ ८ ॥

प्रणिधिरुवाच—'इतो दुर्गदाहं विधाय यदा गतो मेघवर्णस्तदा चित्रवर्णेन प्रसादितेनोक्तम्—'अयं मेघवर्णोऽत्र कर्पूरद्वीपराज्येऽभिषिच्यताम् ।

चक्रवाको ब्रूते—ततस्ततः ।' प्रणिधिरुवाच—' ततः प्रधानमन्त्रिणा गृध्रेणाभिहितम्—'देव, नेदमुचितम् । प्रसादान्तरं किमपि क्रियताम् यतः ।

अविचारयतो युक्तिकथनं तुषखण्डनम् ।
नीचेषूपकृतं राजन्वालुकास्विव मूत्रितम् ॥ ९ ॥

महतामास्पदे नीचः कदापि न कर्तव्यः । तथा चोक्तम्—

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ १० ॥

चित्रवर्णः पृच्छति—, कथमेतत् ।' मन्त्री कथयति—

कथा ४ ।

अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तेन मुनिना काकेन नीयमानो मूषिकशावको दृष्टः । ततः स्वभावदयात्मना तेन मुनिना नीवारकणैः संवर्धितः । ततो बिडालस्तं मूषिकं खादितुमुपधावति । तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश । ततो मुनिनोक्तम्—,मूषिक, त्वं मार्जारो भव । ततः स बिडालः कुक्कुरं दृष्ट्वा पलायते ततो मुनिनोक्तम्—'कुक्कुराद्बिभेषि । त्वमेव कुक्कुरो भव ।' स च कुक्कुरो व्याघ्राद्बिभेति ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः । अथ तं व्याघ्रं मुनिर्मूषिकोऽयमिति पश्यति । अथ तं मुनिं दृष्ट्वा व्याघ्रं च सर्वे वदन्ति—'अनेन मुनिना मूषिको व्याघ्रतां नीतः ।' एतच्छ्रुत्वा स व्याघ्रोऽचिन्तयत्—'यावदनेन मुनिना स्थातव्यं तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते' इत्यालोच्य मूषिकस्तं मुनिं हन्तुं गतः । ततो मुनिना तज्ज्ञात्वा, पुनर्मूषिको भव, इत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि—नीचः श्लाघ्यपदम ' इत्यादि । अपरं च सुकरमिदमिति न मन्तव्यम् शृणु ॥

भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान् ।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात् ॥ ११ ॥

चित्रवर्णः पृच्छति—'कथमेतत् ।, मन्त्री कथयति—

कथा ५ ।

अस्ति मालवदेशे पद्मगर्भनामधेयं सरः । तत्रैको वृद्धो बकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित्कुलीरेण दृष्टः पृष्टश्च—'किमिति भवानत्राहारत्यागेन तिष्ठति ।'
बकेनोक्तम्—मत्स्या मम जीवनहेतवः । ते कैवर्तैरागत्य व्यापादयितव्या इति वार्ता नगरोपान्ते मया श्रुता । अतो वर्तनाभावादेवास्मन्मरणमुपस्थितमिति ज्ञात्वाहारेष्वनादरः कृतः ।' ततो मत्स्यैरालोचितम्'इह समये तावदुपकारक एवायं लक्ष्यते । तदयमेव यथाकर्तव्यं पृच्छ्यताम् । तथा चोक्तम्—

उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ १२ ॥

मत्स्या ऊचुः 'भो बक, कोऽत्र रक्षणोपायः ।' बको ब्रूते—अस्ति रक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहमेकैकशो युष्मान्नयामि मत्स्या आहुः—एवमस्तु ।' ततोऽसौ बकस्तान्मत्स्यानेकैकशो नीत्वा खादति । अनन्तरं कुलीरकस्तमुवाच—'भो बक, मामपि तत्र नय ।' ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान् । कुलीरकोऽपि मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्याचिन्तयत्—'हा, हतोऽस्मि मन्दभाग्यः । भवतु । इदानीं समयोचितं व्यवहरिष्यामि, इत्यालोच्य कुलीरस्तस्य ग्रीवां चिच्छेद । स बकः पञ्चत्वं गतः । अतोऽहं ब्रवीमि—भक्षयित्वा बहून्मत्स्यान् इत्यादि ॥ ततश्चित्रवर्णोऽवदत्, शृणु तावन्मन्त्रिन्, मयैतदालोचितमास्ति । अत्रावस्थितेन मेघवर्णेन राजा यावन्ति वस्तूनि कर्पूरद्वीपस्योत्तमानि तावन्त्यस्माकमुपनेतव्यानि तेनास्माभिर्महासुखेन विन्ध्याचले स्थातव्यम् ।' दूरदर्शी विहस्याह—'देव,

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा' ॥ १३ ॥

राजाह—'कथमेतत्' मन्त्री कथयति—

कथा ६ ।

अस्ति देवीकोट्टनाम्नि नगरे देवशर्मा नाम ब्राह्मणः । तेन महाविषुवत्संक्रान्त्यां सक्तुपूर्णशराव एकः प्राप्तः । ततस्तमादायासौ कुम्भकारस्य भाण्डपूर्णमण्डपैकदेशे रौद्रेणाकुलितः सुप्तः । ततः सक्तुरक्षार्थं हस्ते दण्डमेकमादायाचिन्तयत्—'यद्यहं सक्तुशरावं विक्रीय दश कपर्दकान्प्राप्स्यामि तदात्रैव तैः कपर्दकैर्घटशरावादिकमुपक्रीयानेकधा वृद्धैस्तद्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय विक्रीय लक्षसंख्यानि धनानि कृत्वा विवाहचतुष्टयं करिष्यामि । अनन्तरं तासु सपत्नीषु रूपयौवनवती या तस्यामधिकानुरागं करिष्यामि । सपत्न्यो यदा द्वन्द्वं करिष्यन्ति तदा कोपाकुलोऽहं ताः लगुडेन ताडयिष्यामि' इत्यभिधाय लगुडः क्षिप्तः । तेन सक्तुशरावश्चूर्णितो भाण्डानि च बहूनि भग्नानि । ततस्तेन शब्देनागतेन कुम्भकारेण तथाविधानि भाण्डान्यवलोक्य ब्राह्मणस्तिरस्कृतो मण्डपाद्बहिष्कृतश्च अतोऽहं ब्रवीमि—'अनागतवतीं चिन्ताम्' इत्यादि ॥ ततो राजा रहसि गृध्रमुवाच—'तात, यथा कर्तव्यं तथोपदिश ।' गृध्रो ब्रूते—

'मदोद्धतस्य नृपतेः संकीर्णस्येव दन्तिनः ।
गच्छन्त्युन्मार्गयातस्य नेतारः खलु वाच्यताम् ॥ १४ ॥

शृणु देव, किमस्माभिर्बलदर्पाद्दुर्गं भग्नम् । न । किन्तु तव प्रतापाधिष्ठितेनोपायेन ।' गृध्रो ब्रूते—'यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम् । अन्यथा वर्षाकालेप्राप्ते पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां स्वदेशगमनमपि दुर्लभं भविष्यति सुखशोभार्थं संधाय गम्यताम् । दुर्ग

भग्नं कीर्तिश्च लब्धैव । ममसंमतं तावदेतत् । यतः ।

संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि ।
सुन्दोपसुन्दावन्योन्यं नष्टौ तुल्यबलौ न किम्' ॥ १५ ॥

राजोवाच—'कथमेतत् ?' मन्त्री कथयति—

कथा ७ ।

पुरा दैत्यौ सहोदरौ सुन्दोपसुन्दनामानौ महता क्लेशेन त्रैलोक्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ । ततस्तयोर्भगवान्परितुष्टः 'वरं वरयतम्' इत्युवाच । अनन्तरं तयोः समधिष्ठितया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितवन्तौ । यद्यावयोर्भगवान्परितुष्टस्तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु । अथ भगवता क्रुद्धेन वरदानस्यावश्यकता विचारमूढयोः पार्वती प्रदत्ता । ततस्तस्य रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योन्यकलहाभ्यां प्रमाणपुरुषः कश्चित्पृच्छयतामिति मतौ कृतायां स एव भट्टारको वृद्धद्विजरूपः समागत्य तत्रोपस्थितः । अनन्तरम् । 'आवाभ्यामियं स्वबललब्धा, कस्येयमावयोर्भवति' इति ब्राह्मणमपृच्छताम् । ब्राह्मणो ब्रूते—

'वर्णश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवानपि ।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ १६ ॥

तद्युवां क्षत्रधर्मानुरागौ । युद्ध एव युवयोर्नियमः । इत्यभिहिते सति 'साधूक्तमनेन' इति कृत्वान्योन्यतुल्यवीर्यौ समकालमन्योन्यघातेन विनाशमुपगतौ । अतोऽहं ब्रवीमि—'संधिमिच्छेत्समेनापि' इत्यादि ॥

राजाह—'प्रागेव किं नोक्तं भवद्भिः ।' मन्त्री ब्रूते—'मद्वचनं किमवसानपर्यन्तं श्रुतं भवद्भिः । तदापि मम संमत्या नायं विग्रहारम्भः साधुगुणयुक्तोऽयं हिरण्यगर्भो न विग्राह्यः ।

तत्र तावद्बहुभिर्गुणैरुपेतः संधेयो ऽयं राजा ।' चक्रवाकोवदत्—'प्रणिधे, अन्यत्र व्रज । सर्वमवगतम् गत्वा पुनरागमिष्यसि । राजा चक्रवाकं पृष्टवान्—'मन्त्रिन्, असंधेयः कः । तच्छ्रोतुमिच्छामि ।' मन्त्री ब्रूते—'देव, कथयामि । शृणु ।

सत्यधर्मव्यपेतेन संदध्यान्न कदाचन ।
स संधितोऽप्यसाधुत्वादचिराद्याति विक्रियाम् ॥ १७ ॥

अपरमपि कथयामि । संधिविग्रहयानासनसंश्रयद्वैधीभावाः षाड्गुण्यम् । कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्च पञ्चांगो मन्त्रः । सामदानभेददण्डाश्चत्वार उपायाः । उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिश्चेति शक्तित्रयम् एतत्सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः ।

या हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदं पश्य चञ्चलापि प्रधावति ॥ १८ ॥

किंतु यद्यपि महामन्त्रिणा गृध्रेण संधानमुपन्यस्तं तथापि तेन राज्ञासंप्रति भूतजयदर्पान्न मन्तव्यम् । देव, तदेवं क्रियताम् । सिंहलद्वीपस्य महाबलो नाम सारसो राजास्मन्मित्रं जम्बुद्वीपे कोपं जनयतु । यतः ।

सुगुप्तिमाधाय सुसंहतेन
बलेन वीरो विचरन्नरातिम् ।
संतापयेद्येन समं सुतप्त-
स्तप्तेन संधानमुपैति तप्तः' ॥ १९ ॥

राज्ञा'एवमस्तु' इति निगद्य विचित्रनामा बकः सुगुप्तलेखं दत्त्वा सिंहलद्वीपेप्रहितः ॥

अथप्रणिधिरागत्योवाच—'देव, श्रूयतां तत्रत्यप्रस्तावः । एवं तत्र गृध्रेणोक्तम्—'देव, यन्मेघवर्णस्तत्र चिरमुषितः स वेत्ति किं संधेयगुणयुक्तो हिरण्यगर्भो न वा' इति। ततोऽसौ राज्ञा समाहूय पृष्टः—'वायस, कीदृशोऽसौ हिरण्यगर्भः चक्रवाको मन्त्री वा कीदृशः।' वायस उवाच—देव, हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः चक्रवाकसमो मन्त्री न क्वाप्यवलोक्यते ।' राजाह—'यद्येवं तदा कथमसौ त्वया वञ्चितः ।' विहस्य मेघवर्णः प्राह—देव,

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥ २० ॥

शृणु देव, तेन मन्त्रिणाहं प्रथमदर्शन एव ज्ञातः किंतु । महाशयोऽसौ राजा। तेन मया स विप्रलब्धः । तथा चोक्तम्—

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा' ॥ २१ ॥

राजोवाच—'कथमेतत् ।' मेघवर्णः कथयति—

कथा ८ ।

अस्ति गौतमस्यारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे नीत्वा गच्छन्धूर्तत्रयेणावलोकितः। ततस्ते धूर्ता यद्येष च्छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवतीति समालोच्य वृक्षत्रयतले क्रोशान्तरेण तस्य ब्राह्मणस्यागमनं प्रतीक्ष्य पथि स्थिताः। तत्रैकेन धूर्तेन गच्छन्स ब्राह्मणोऽभिहितः—भो ब्राह्मण, किमिति कुक्कुरः स्कन्धेनोह्यते ।' विप्रेणोक्तम्—'नायं श्वा, किंतु यज्ञच्छागः ।' अथानन्तरस्थितेनान्येन धूर्तेन तथैवोक्तम् । तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः । यतः ।

मतिर्दोलायते सत्यं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितश्चासौ म्रियते चित्रकर्णवत्' ॥ २२

राजाह—'कथमेतत् ।' स कथयति—

कथा ९ ।

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्य सेवकास्त्रयः काको व्याघ्रो जम्बुकश्च । अथ तैर्भ्रमद्भिः कश्चिदुष्ट्रो दृष्टः पृष्टश्च—'कुतो भवानागतः सार्थाद्भ्रष्टः' स चात्मवृत्तान्तमकथयत् । ततस्तैर्नीत्वा सिंहेऽसौ समर्पितः । तेनाभयवाचं दत्त्वा चित्रकर्ण इति नाम कृत्वा स्थापितः अथ कदाचित्सिंहस्य शरीरवैकल्याद्भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः । ततस्तैरालोचितम्—'चित्रकर्णमेव यथा स्वामी व्यापादयति तथानुष्ठीयताम् । किमनेन कण्टकभुजा ।' व्याघ्र उवाच—'स्वामिनाभयवाचं दत्त्वानुगृहीतः, तत्कथमेवं संभवति ।' काको ब्रूते—'इह समये परिक्षीणः स्वामी पापमपि करिष्यति । यतः ।

त्यजेत्क्षुधार्ता महिला स्वपुत्रं
खादेत्क्षुधार्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ॥ २३ ॥

इति संचिन्त्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तम्—'आहारार्थं किंचित्प्राप्तम् ।' तैरुक्तम्—'यत्नादपि न प्राप्तं किंचित् ।' सिंहेनोक्तम्—'कोऽधुना जीवनोपायः ।' काको वदति—'देव स्वाधीनाहारपरित्यागात्सर्वनाशोऽयमुपस्थितः ।' सिंहेनोक्तम्—'अत्राहारः कः

स्वाधीनः ।' काकः कर्णे कथयति—'चित्रकर्णः' इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । अभयवाचं दत्त्वा धृतोऽयमस्माभिः । तत्कथमेवं संभवति । तथा च ।

न भूप्रदानं न सुवर्णदानं
न गोप्रदानं न तथान्नदानम् ।
यथा वदन्तीह महाप्रदानं
सर्वेषु दानेष्वभयप्रदानम् ॥ २४ ॥

काको ब्रूते—'नासौ स्वामिना व्यापादयितव्यः । किंचास्माभिरेव तथा कर्तव्यं यथासौ स्वदेहदानमङ्गीकरोति ।' सिंहस्तच्छ्रुत्वा तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्वानादाय सिंहान्तिकं गतः । अथ काकेनोक्तम्—'देव यत्नादप्याहारो न प्राप्तः । अनेकोपवासखिन्नः स्वामी । तदिदानीं मदीयमांसमुपयुज्यताम् । यतः ।

स्वामिमूला भवन्त्येव सर्वाः प्रकृतयः खलु ।
समूलेष्वपि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥ २५ ॥

सिंहेनोक्तम्—'वरं प्राणपरित्यागः । न पुनरीदृशि कर्मणि प्रवृत्तिः ।' जम्बुकेनापि तथोक्तम् । ततः सिंहेनोक्तम्—'मैवम् ।' अथ व्याघ्रेणोक्तम्—'मद्देहेन जीवतु स्वामी ।' सिंहेनोक्तम्—'न कदाचिदेवमुचितम् ।' अथ चित्रकर्णोऽपि जातविश्वासस्तथैवात्मदानमाह । ततस्तद्वचनात्तेन व्याघ्रेणासौ कुक्षिं विदार्य व्यापादितः सर्वैर्भक्षितः । अतोऽहं ब्रवीमि—'मतिर्दोलायते सत्यम्' इत्यादि । ततस्तृतीयधूर्तवचनं श्रुत्वा स्वमतिभ्रमं निश्चित्य छागं त्यक्त्वा ब्राह्मणः स्नात्वा गृहं ययौ । स छागस्तैर्धूर्तैर्नीत्वा भक्षितः । अतोऽहं ब्रवीमि—'आत्मौपम्येन यो वेत्ति' इत्यादि । राजाह—'मेघवर्ण,

कथं शत्रुमध्ये त्वया चिरमुषितम् । कथं वा तेषामनुनयः कृतः । मेघवर्ण उवाच—'देव' स्वामिकार्यार्थिना स्वप्रयोजनवशाद्वा किं न क्रियेत । पश्य ।

लोको वहति किं राजन्न मूर्ध्ना दग्धुमिन्धनम् ।
क्षालयन्ती च वृक्षाङ्घ्रिं नदी वेलां निकृन्तति ॥ २६ ॥

तथा चोक्तम्—

स्कन्धेनापि वहेच्छत्रून्कार्यमासाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ २७ ॥

राजाह कथमेतत् । मेघवर्णः कथयति

कथा १० ।

अस्ति जीर्णोद्याने मन्दविषो नाम सर्पः । सोऽतिजीर्णतयाहारमप्यन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः । ततो दूरादेव केनचिन्मण्डूकेन दृष्टः पृष्टश्च—'किमिति त्वमाहारं नान्विष्यसि सर्पोऽवदत्—'गच्छ भद्र, मम मन्दभाग्यस्य प्रश्नेन किम् ।' ततः संजातकौतुकः स च भेकः 'सर्वथा कथ्यताम्', इत्याह । सर्पोऽप्याह—'भद्र, ब्रह्मपुरवासिनः श्रोत्रियस्य पुत्रो विंशतिवर्षीयः सर्वगुणसंपन्नो दुर्दैवान्मम नृशंसस्वभावाद्दष्टः । तं पुत्रं सुशीलनामानं मृतमालोक्य मूर्छितः कौण्डिन्यः पृथिव्यां लुलोठ । अनन्तरं ब्रह्मपुरवासिनः सर्वे बान्धवास्तत्रागत्योपविष्टाः । तत्र कपिलो नाम स्नातकोऽवदत्—'अरे कौण्डिन्य, मूढोऽसि तेनैवं विलपसि शृणु ।

क्रोडीकरोति प्रथमं यथा जातमनित्यता ।
धात्रीव जननी पश्चात्तथा शोकस्य कः क्रमः ॥ २८ ॥

क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिरद्यापि तिष्ठति ॥ २९ ॥

अतः संसारं विचारय । शोकोऽयमज्ञानस्य प्रपञ्चः । पश्य ।

अज्ञानं कारणं न स्याद्वियोगो यदि कारणम् ।
शोको दिनेषु गच्छत्सु वर्धतामपयाति किम् ॥ ३० ॥

तदत्रात्मानमनुसंधेहि । शोकचर्चां परिहर ।

अकाण्डपातजातानां गात्राणां मर्मभेदिनाम् ।
गाढशोकप्रहाराणामचिन्तैव महौषधिः' ॥ ३१ ॥

ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्—'तदलमिदानीं गृहनरकवासेन । वनमेव गच्छामि ।' कपिलः पुनराह—

'वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ३२ ॥

अन्यच्च ।

दुःखमेवास्ति न सुखं यस्मात्तदुपलक्ष्यते ।
दुःखार्तस्य प्रतीकारे सुखसंज्ञा विधीयते' ॥ ३३ ॥

कौण्डिन्यो ब्रूते—'एवमेव' । ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः—'यदद्यारभ्य मण्डूकानां वाहनं भविष्यसि' इति । कपिलो ब्रूते—'संप्रत्युपदेशासहिष्णुर्भवान् । शोकाविष्टं ते हृदयम् । तथापि कार्यं शृणु ।

सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सतां संगो हि भेषजम् ॥ ३४ ॥

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशामृतप्रशान्तशोकानलो यथाविधि दण्डग्रहणं कृतवान् । अतो ब्राह्मणशापान्मण्डूकान्वोढुमत्र तिष्ठामि' । अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादनाम्नोऽग्रे तत्कथितम् । ततोऽसावागत्य मण्डूकनाथस्तस्य सर्पस्य पृष्ठमारूढ-

वान् । स च सर्पस्तं पृष्ठे कृत्वा चित्रपदक्रमं जगाम । परेद्युश्चलितुमसमर्थं तं मण्डूकनाथोऽवदत्—'किमद्य भवान्मन्दगतिः ।' सर्पो ब्रूते—'देव, आहारविरहादसमर्थोऽस्मि ।' मण्डूकनाथोऽवदत्—'अस्मदाज्ञया मण्डूकान्भक्षय ।' ततः गृहीतोऽयं महाप्रसादः' इत्युक्त्वा क्रमशो मण्डूकान्खादितवान् । अतो निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः । अतोऽहं ब्रवीमि—'स्कन्धेनापि वहेच्छत्रून्' इत्यादि । 'देव, यात्विदानीं पुरावृत्ताख्यानकथनम् । सर्वथा संधेयोऽयं हिरण्यगर्भो राजा संधीयतामिति मे मतिः ।' राजोवाच—'कोऽयं भवतो विचारः, यतो जितस्तावदयमस्माभिस्ततो यद्यस्मत्सेवया वसति तदास्ताम् । नो चेद्विगृह्यताम् ।'

अत्रान्तरे जम्बूद्वीपादागत्य शुकेनोक्तम्—'देव, सिंहलद्वीपस्य सारसो राजा संप्रति जम्बूद्वीपमाक्रम्यावतिष्ठते । राजा ससंभ्रमं ब्रूते—'किमिम् शुकः पूर्वोक्तं कथयति ।' गृध्रः स्वगतमुवाच—'साधुरे चक्रवाक मन्त्रिन् सर्वज्ञ, साधु साधु ।' राजा सकोपमाह—'आस्तां तावदयम् । गत्वा तमेव समूलमुन्मूलयामि ।' दूरदर्शी विहस्याह—

न शरन्मेघवत्कार्यं वृथैव घनगर्जितम् ।
परस्यार्थमनर्थं वा प्रकाशयति नो महान् ॥ ३५ ॥

अपरं च ।

एकदा न विगृह्णीयाद् बहून्राजाभिघातिनः ।
सदर्पोऽप्युरगः कीटैर्बहुभिर्नाश्यते ध्रुवम् ॥ ३६ ॥

देव, किमिति विना संधानं गमनमस्ति । यतस्तदास्मत्पश्चात्प्रकोपोऽनेन कर्तव्यः । अपरं च ।

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा' ॥ ३७ ॥

राजाह—'कथमेतत् ।' दूरदर्शी कथयति—

कथा ११ ।

अस्त्युज्जयिन्यां माधवो नाम विप्रः । तस्य ब्राह्मणी प्रसूता बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणाय राज्ञः पार्वणश्राद्धं दातुमाह्वानमागतम् । तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत्—'यदि सत्वरं न गच्छामि तदान्यः कश्चिच्छ्रुत्वा श्राद्धं प्रहीष्यति । यतः ।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ३८ ॥

किंतु बालकस्यात्र रक्षको नास्ति । तत्किं करोमि । यातु । चिरकालपालितमिमं नकुलं पुत्रनिर्विशेषं बालकरक्षायां व्यवस्थाप्य गच्छामि ।' तथा कृत्वा गतः । ततस्तेन नकुलेन बालकसमीपमागच्छन्कृष्णसर्पो दृष्ट्वा व्यापाद्य कोपात्खण्डं खण्डं कृत्वा खादितः । ततोऽसौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपगम्य तच्चरणयोर्लुलोठ । ततः स विप्रस्तथाविधं तं दृष्ट्वा बालकोऽनेन खादित इत्यवधार्य नकुलं व्यापादितवान् । अनन्तरं यावदुपसृत्यापत्यं पश्यति ब्राह्मणस्तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति । ततस्तं नकुलमुपकारकमिति ज्ञात्वा प्रभावितचेताः सत्वरं विषादमगमत् । अतोऽहं ब्रवीमि—'योऽर्थतत्त्वमविज्ञाय' इत्यादि ॥

राजाह—'मन्त्रिन्' एष ते निश्चयः' मन्त्री ब्रूते—'एवमेव यतः-

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्-
वृणुते हि विमृश्यकारिण-
गुणलुब्धाःस्वयमेव संपदः ॥ ३९ ॥

तदेव, यदिदानीमस्मद्वचनं क्रियते तदा संधाय गम्यताम् ।

राजाह—'कथमेवं संभवति ।' मन्त्रीब्रूते—'देव, सत्वरं भविष्यति-यतः ।

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति ॥ ४० ॥

विशेषतश्चायं धर्मज्ञो राजा सर्वज्ञो मन्त्री च । ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात्तत्कृतकार्यसंदर्शनाच्च ।

राजाह—'अलमुत्तरोत्तरेण । यथाभिप्रेतमनुष्ठीयताम् ।' एतन्मन्त्रयित्वा गृध्रो महामंत्री 'तत्र तथार्हं कर्तव्यम्' इत्युक्त्वा दुर्गाभ्यन्तरं चलितः । ततः प्रणिधिबकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितम्—' देव संधिं कर्तुं महामंत्री गृध्रोऽस्मत्समीपमागच्छति ।' राजहंसो ब्रूते—'मंत्रिन्' पुनः संबन्धिना केनचिदत्रागन्तव्यम् ।' सर्वज्ञो विहस्याह—'देव, न शंकास्पदमेतत् । यतोऽसौ महाशयो दूरदर्शी । अथवा स्थितिरियं मन्दमतीनाम् । कदाचिच्छंकैव न क्रियते । कदाचित्सर्वत्र शंका ।

दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति ॥ ४१ ॥

तद्देव, यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सुसज्जीक्रियताम् ।' तथानुष्ठिते सति स गृध्रो मंत्री दुर्गद्वाराच्चक्रवाकेणोपागत्य सत्कृत्यानीय राजदर्शनं कारितो दत्तासने चोपविष्टः । चक्रवाक उवाच—'युष्मदायत्तं सर्वम् । स्वेच्छयोपभुज्यतामिदं राज्यम् ।' राजहंसो ब्रूते—'एवमेव ।' दूरदर्शी कथयति—'एवमेवैतत् । किंत्विदानीं बहुप्रपञ्चवचनं निष्प्रयोजनम् । यतः ।

लुब्धमर्थेन गृह्णीयात्स्तब्धमञ्जलिकर्मणा ।
मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितम् ॥ ४२ ॥

तदिदानीं संधाय गम्यताम् । महाप्रतापश्चित्रवर्णो राजा । राजाह—'भवन्तो महान्तः पण्डिताश्च तदत्रास्माकं यथाकार्यमुपदिश्यताम् ।' मंत्री ब्रूते—'आः, किमेवमुच्यते ।

मृगतृष्णासमं वीक्ष्य संसारं क्षणभंगुरम् ।
सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥ ४३ ॥

तन्मम संमतेन तदेव क्रियताम् । यतः ।

अश्वमेधसहस्राणि सत्यं च तुलया कृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ ४४ ॥

अतः सत्याभिधानदिव्यपुरःसरयोरप्यनयोर्भूपालयोः काञ्चनाभिधानसंधिर्विधीयताम् ।' सर्वज्ञो ब्रूते—एवमस्तु ।' ततो राजहंसेन राज्ञा वस्त्रालंकारोपहारैः स मंत्री दूरदर्शी पूजितः प्रहृष्टमनश्चक्रवाकं गृहीत्वा राज्ञो मयूरस्य संनिधानं गतः । तत्र चित्रवर्णेन राज्ञा सर्वज्ञगृध्रवचनाद्बहुमानदानपुरःसरं संभाषितस्तथाविधं संधिं स्वीकृत्य राजहंससमीपं प्रस्थापितः—दूरदर्शी ब्रूते—'देव, सिद्धं नः समीहितम् । इदानीं स्वस्थानमेव विन्ध्याचलं व्यावृत्य प्रतिगम्यताम् ।' अथ सर्वे स्वस्थलं प्राप्य मनोभिलषितं प्राप्नुवन्निति । विष्णुशर्मणोक्तं—'अपरं किं कथयामि । कथ्यताम् ।' राजपुत्रा ऊचुः—'तव प्रसादाद्राज्यव्यवहाराङ्गं ज्ञातम् । ततः सुखिनो भूता वयम् । विष्णुशर्मोवाच—यद्यप्येवं तथाप्यपरमपीदमस्तु—

श्रीमान्धवलचन्द्रोऽसौ जीयान्माण्डलिको रिपून् ।
येनायं संग्रहो यत्नाल्लेखयित्वा प्रचारितः ॥ ४५ ॥

इति हितोपदेशे संधिर्नाम चतुर्थः कथासंग्रहः समाप्तः ।

समाप्तोऽयं हितोपदेशः ।

शुभं भूयात् ।